संस्कृत–त्रैमासिकी
जनवरी–२०१८–अक्टूबर २०१८

ISSN : 2278-3741
अङ्काः १ – ४
वर्ष : ४२

# अजस्रा

**अखिल-भारतीय-संस्कृत-परिषद्**
**लखनऊ**

# नियमाः

१– अजस्रानाम्नीयं त्रैमासिकी संस्कृतपत्रिका मकर–मेष–कर्क– तुला–सङ्क्रान्तिषु (जनवरी–अप्रैल–जुलाई–अक्तूबरमासेषु) प्रकाशिता भवति।

२– अस्याः पत्रिकाया उद्देश्यं संस्कृतसम्पदां संरक्षणम्, विभिन्नपद्धतिजुषां रचनानां संवर्धनम्, प्रातिभनूतनकृतीनां संसर्जनञ्च।

३– समालोचनाभिलाषुकैः प्रकाशकैर्लेखककैर्वा नवीनकृतीनां द्वयी प्रेषणीया।

४– पत्रिकायामस्यां कवितालेखकथानाटकादीनि शोधनिबन्धाश्च स्थानं प्राप्स्यन्ति।

५– प्रकाशनाय प्रेषिताः सर्वविधा रचना एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरै–र्लिखिताः टङ्किता वा स्युः।

६– कृतीनां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादके संरक्षितोऽस्ति।

७– अस्वीकृता लेखाः टिकटसहितपत्रपुटके लब्धे सति लेखकेभ्यः प्रत्यावर्तिष्यन्ते।

८– लेखकेभ्यस्तल्लेखानां दशसङ्ख्याका उन्मुद्रितयः प्रदास्यन्ते।

संस्कृत-त्रैमासिकी
ISSN-2278-3741

# अजस्रा

अङ्काः १ – ४ जनवरी–२०१८–अक्टूबर २०१८ वर्षः ४२

**अखिल–भारतीय–संस्कृत–परिषद्**
देववाणी–भवनम्, अलीगञ्जम्,
लखनऊ–२२६०२४

**शुल्कम्**

| | | | | |
|---|---|---|---|---|
| वार्षिकम् | २४०.०० | रूप्यकाणि | $ | २५.०० |
| एकस्याऽङ्कस्य | ६०.०० | रूप्यकाणि | $ | १०.०० |
| आजीवनम् | २१००.०० | रूप्यकाणि | $ | २१०.०० |

**प्राज्ञपरिषत्**

प्रो० राधावल्लभ–त्रिपाठी

प्रो० राजेन्द्र–मिश्रः

**प्रधान–सम्पादकः**

**प्रो० अशोककुमारकालिया**

**सम्पादक :**

**प्रो० बृजेशकुमारशुक्लः**

---

अखिल भारतीय संस्कृत–परिषद्, देववाणी–भवनम्, अलीगञ्ज, लखनऊ की ओर से श्री जितेन्द्र कुमार त्रिपाठी द्वारा प्रकाशित और प्रो० बृजेशकुमार शुक्ल द्वारा सम्पादित तथा श्री मनीष मेहता द्वारा प्नार आफसेट, 17 अशोक मार्ग, हजरतगञ्ज, लखनऊ से मुद्रित।

# अनुक्रमः


| | | | | |
|---|---|---|---|---|
| ● | सम्पादकीयम् | | | ४ |
| १. | सप्तशत्या लौकिकावेदनम् | – | डॉ० जयश्रीचट्टोपाध्यायः | ५ |
| २. | वैदिक–श्रौतयागाः | – | डॉ० मितालीदेवः | १४ |
| ३. | केलि–सखी | – | प्रो० ओम्प्रकाशपाण्डेयः | २० |
| ४. | नागानन्दनाटके जीवनस्य पञ्चावस्थाः | – | अनिलप्रतापगिरिः | ३१ |
| ५. | मन्त्रार्थदीपिकामन्त्रार्थचन्द्रोदययोः तुलनात्मकं विवेचनम् | – | इन्द्रेशकुमारझा | ३७ |
| ६. | उपनिषत्सु अद्वैतवादस्य विवेचनम् | – | डॉ० श्रीमती ज्योतिकुमारी | ४२ |
| ७. | संस्कृताऽध्ययनप्रयोजनम् | – | डॉ० शेषमणिशुक्लः | ४६ |
| ८. | मूर्धनि कालविधानशास्त्रम् | – | डॉ० अंशुमान्शुक्लः | ४६ |
| ९. | कविता–मकरन्दम् | – | प्रो० अशोककुमारकालिया | ५५ |

# सम्पादकीयम्

अखिलभारतीयसंस्कृतपरिषदाऽजस्रा नामधेयैषा पत्रिकाऽजस्रमेव प्रकाश्यते। परन्तु खल्विदानीं संस्कृतलेखानामथ च संस्कृतभाषयोत्कृष्ट–रचनानामसम्प्राप्त्या पत्रिकेयमजस्राऽजस्रत्वं क्वचिन्नाऽधिगतवती। एतदर्थं सम्पादको नितरां खेदमनुभवति। विदुषां लेखाभावात्संस्कृतभाषाऽथवा पत्रिकेयमवरुद्धा स्याच्चेत्तर्हि न खलु कल्पत औचित्याय अतएवाऽभि–नवच्छात्राणामुत्साहवर्धनायाऽत्र तेषां तासाञ्च लेखाः सम्मिलिताः सन्ति येषूत्कृष्टत्वमतितरां प्रायो न दृश्यते तथापि समाजेऽस्मिन् संस्कृतमजस्रं प्रवहतीति तथ्यमजस्रेयं प्रदर्शयति। अत्र प्रो० अशोककुमार कालियामहोदयानां कवितासङ्ग्रहः कश्चित् **'कवितामकरन्द'** मिति नाम सम्पादकेन समपादि। निश्चप्रचमेव विपश्चितां कृते खल्वेष सङ्ग्रहः काव्यरसानन्दं प्रदास्यत इति विश्वसिति सम्पादकः। अथ च प्रो० ओम्प्रकाशपाण्डेयवर्याणां **'केलिसखी'** नामधेया कविता सहृदयेषु किल केलिसखित्वमिवाचरिष्यतीति मनुतेऽयं सम्पादकः। अन्ये भावप्रबोधका उत शोधपरका लेखा अत्र प्रकाशिताः पाठकानां सुधियां छात्रच्छात्रीणां च कृते बोधप्रदाः प्रकृष्टशोधोद्वाहकाः संस्कृतसरणिप्रदर्शकाश्च बोभूयिष्यन्त इति पत्रिकाया एषोऽङ्कः प्रकाशितः। नितरां सर्वसंशोधनं विहितं तथापि चेत्त्रुटयो दरीदृश्यन्ते तर्हि विद्वज्जनमतयः संशोध्य वाचयेयुरिति समेभ्यो भद्रं कामयमानोऽयं सम्पादको विरमतीति शम्।

***

**डॉ० जयश्रीचट्टोपाध्यायः**
कोलकाता

## सप्तशत्या लौकिकावेदनम्

महर्षिव्यासदेवप्रोक्तस्य मार्कण्डेयपुराणस्य एकाशीतितमाध्यायात् त्रिनवतितमाध्यायपर्यन्तं त्रयोदशाध्यायगताः सप्तशतंश्लोकाः चण्डीति सञ्ज्ञयाभिधीयन्ते या चण्डी भङ्गुरजीवनस्य साक्षाद् विशल्यकरणी। सर्वं दुःखं दुःखं, सर्वं क्षणिकं क्षणिकं, विदित्वापि मोहपरवशाः प्राकृतजनाः प्रव्रज्यां न वरयन्ति, किन्तु महामायाप्रभावेण मधुसम्पृक्तासिलतासदृशेन संसारपाशेनाबद्धा नितरामेव क्लिश्नन्ति। सुचरिता सप्तशती नानन्यसाधारणस्य, परन्तु प्राकृतजनस्य व्यर्थतामुपाश्रित्य प्रारभते। यद्यपि चैत्रवंशसमुद्भवो राजा सुरथो राजकीयेन स्वमहिम्ना असाधारण एव भवितुमर्हति किन्तु तस्य सर्वातिशायिनी व्यर्थता महता दैन्येन तमकृतार्थं हताश्वासं दीनं दुर्बलं कृत्वा सप्तशत्याः प्रथमाध्याये तमुपन्यस्यति। सर्वथा पराभूतस्य व्यर्थमनोरथस्य विमानितस्य तस्याख्यानमेवात्र सप्तशत्या मौलीभूतं येन तस्यैव ऋद्ध्या सिद्ध्या च चण्डीयं परिसमाप्यते।

स्वारोचिषस्य द्वितीयस्य मनोर्ज्येष्ठस्तनय आसीच्चैत्रः। तस्य वंशे समस्तक्षितिमण्डलाधिपः सुरथो नाम राजा प्रादुरासीत्। 'राजा प्रकृतिरञ्जनात्'। अतोऽयं प्रजाः पुत्रानिव स्नेहेन पालयामास। कदाचिदयं प्रबलारिभिः कोलाविद्ध्वंसिभिः काश्मीरप्रान्तदेशीयैर्यवनैः शत्रुभिराक्रान्तो बभूव। स्वपुरमागत्य यदायं निजदेशाधिपोऽभवत्तदापि बलवद्भिरमात्यैस्तस्य कोषो लुण्ठितः, हृतकोषस्तैर्दुरात्मभिर्गृहीतबलवाहनः स राजा सर्वथा निःस्वो बभूव। यथा दृश्यते सप्तशत्याम् –

**'स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः।**
**सुरथो नाम राजाभूत् समस्ते क्षितिमण्डले।।**

**तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्।**
**बभूवुः शत्रवो भूपाः कोलाविद्ध्वंसिनस्तदा।।**

**तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः।**
**न्यूनैरपि स तैर्युद्धे कोलाविद्ध्वंसिभिर्जितः।।**
**ततः स्वपुरमायातो निजदेशाधिपोऽभवत्।।**
**आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः।।**

**अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः।**
**कोषो बलञ्चापहृतं तत्रापि स्वपुरे ततः।।**[1]

दशा जनानां सुस्थिरा न भवति। सुरथो च आसीदेकदा महिमानमधिरूढः क्षितिपो दीनजनप्रतिपालकः स एवाद्य स्वराज्यं स्वमहिमानमपहाय दीनातिदीनः संवृत्तः। 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण'। अतो दुःखेन दीर्णहृदयः स राजा एकाकी हयमारुह्य मृगयाव्याजेन गहनं वनं ययौ। मृगयाव्याजस्तेन समाश्रितो यतस्तस्य दुरवस्थां लज्जयैवापरित्यक्तां कस्यापि सविधमयं नानेतुमैच्छत् –

**'ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः।**
**एकाकी हयमारुह्य जगाम गहनं वनम्'।।**[2]

राज्ञस्तीव्रतमं दुःखं परिस्फुटम्। 'स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति'। स्वजनबन्धुरहितस्यास्य मनोदुःखनिवेदनाय नासीत् कुतोऽपि कश्चिज्जनः। विजयिनो नृपतेर्बन्धवः सुलभा न सन्ति विजितस्य पक्षपातिनो लोके। अतस्त्यक्तः स्वजनबन्धुभिर्निबिडनिजदुःखेन केवलं स राजा मृगयाव्याजेन वनमगमत्। नाभिमानसम्पन्नो भूपतिः कस्यापि कृपास्पदमुपहासास्पदं वा भवितुमर्हति। सप्तशत्यां सुरथस्य दुःखमेवमेव वर्णनया प्रत्यक्षायमाणतां गतम्। दीनजना राज्ञो दुःखेन दुःखमपारमत्रानुभवन्ति। नात्र सप्तशत्या प्रथमाध्याये राजा सुरथोऽलौकिकः कश्चित् पुरुषः सवृंत्तः, किन्तु लौकिकेन दुःखेन नितरां निपीड्यमानः अखिलविपदापन्नानां मनुष्याणामयं साकारविग्रहरूपेणात्मानमुपायनीकरोति। अथ द्विजवर्यस्य मेधसो मुनेः शान्तरसास्पदमाश्रममुपगतः स राजा मनसा न शान्तिमाप, यतो 'मनो दुर्निग्रहं चलम्'। तत्रापि ममत्वाकृष्टो नृपतिरचिन्तयत्– 'मम राज्यमिदानीं कीदृशमस्ति, असाधुभिर्मम भृत्यैः सम्यक् पाल्यते न पाल्यते

---

१. दुर्गासप्तशत्याम् १.४–८
२. तदेव १.६

वा, मम मदस्राविणो हस्तिनो भोगः किं सम्यगेव चलति वा न वा। ये तावन्मम भृत्या ममानुगता आसन्नेकदा त एवाद्य मम रिपोरनुजीविनः सञ्जाताः। इदानीममितव्ययेन तेषाममात्यानां मम सयत्नवर्धितो राजकोषो नूनं क्षयं गमिष्यति–

**'सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।**
**मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत्।।**
**मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा।।**

**न जाने स प्रधानो मे शूरहस्ती सदामदः।**
**मम वैरिवशं यातः कान् भोगानुपलप्स्यते।।**

भोः कष्टम्–

**'ये ममानुगता नित्यं प्रसादधनभोजनैः।**
**अनुवृतिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम्।।**

**असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्।**
**सञ्चितः सोऽतिदुःखेन क्षयं कोषो गमिष्यति।।**

**एतच्चान्यच्च सततं चिन्तयामास पार्थिवः।**[१]

नाऽयं राजा रामादिवदलोकसामान्यः कश्चिन्महापुरुषो न वाऽयं दुःखेनष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः शुभाशुभपरित्यागी कश्चित् प्रव्रजितः सन्न्यामुपगतः। अतो राज्यभ्रष्टोऽपि राज्याद्बहिर्गतोऽयं स्वराज्यस्य कुशलाकुशलचिन्तया नितरामेव पर्याकुल आसीद् यथा प्राकृतजनाः स्वल्पसमयेन गृहाद् बहिरागत्य गृहद्वारे कुञ्चिका दत्ता न दत्ता वा, पुत्रादयः परिजनाः स्वस्था वर्तन्ते न वर्तन्ते वा किं न तत्र गृहे सहसा काचन विपदुपगतेति दुश्चिन्तया विपर्यस्ता भवन्ति तथैवायमतिमात्रमधीरतां प्राप्तः कश्चित् कातरो दुर्बलो नरमात्रसाधारणो मनोर्वंशावतीर्णा मानवश्चित्रितः सुरथो नाम राजा लौकिकानुभवानुषङ्गेण यश्च कथमपि जनानामद्यत्वेऽपि दुरासदो न भवति। अथ महर्षेर्मेधस आश्रमे लौकिकेनैव दुःखेन सम्प्राणतां गतेन केनचिद् वैश्येन राज्ञः परिचयोऽभवत् –

**'तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः।।**

---

१. तदेव १.१२–१६

**स पृष्टस्तेन कस्त्वम्भोः हेतुश्चागमनेऽत्र कः।**
**सशोक इव कस्मात्वं दुर्मना इव लक्ष्यसे।।**

**इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम्।**
**प्रत्युवाच स तं वैश्यं प्रश्रयावनतो नृपम्'।।**[१]

अथ वैश्येनात्मनो दुर्विषहं दुःखं सुरथाय राज्ञे निवेदितम्, यच्च राज्ञोऽपि दुःखमतिशेते। यतोऽयं वैश्यो धनलोभान्नामात्यैर्नारिभिर्वा, किन्तु मनोऽभिरामया स्वभार्यया परमस्नेहभाजनैः जीवनामृतसञ्चारिभिः पुन्नाम्नो नरकात्त्रायकैः स्वपुत्रैः सर्वस्वमादाय निर्दयमेव परित्यक्तो वनमागतः। न तस्य कश्चिदाप्तसहायकोऽस्ति, यदाह राजानम्–

**'समाधिर्नाम वैश्योऽयमुत्पन्नो धनिनां कुले।**
**पुत्रदारैर्निरस्तश्च धनलोभदसाधुभिः।।**

**विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम्।**
**वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः'।।**[२]

परमाकाङ्क्षितैः स्त्रीपुत्त्रैर्जीवनामृतसञ्चरिष्णुभिरेवं स्नेहहीनतया नैष्ठुर्येण स्वगृहाद् बहिष्कृतोऽपि स्नेहदुर्बलचित्तो वैश्यः समाधिस्तान् विस्मर्तुमशक्तस्तेषामेव कुशलाकुशलचिन्तया नितरामासीद् व्याकुलः दुःखेन दीर्णहृदयोऽपि मनसा तेषामेव कुशलाकुशलादिकं विमृशन्नशान्तोऽयं सुरथं राजानमाह –

**'सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम्।**
**प्रवृत्तिं स्वजनानाञ्च दाराणाञ्चात्र संस्थितः।।**
**किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतम्।।**
**कथयन्ते किन्नु सद्वृता दुर्वृत्ताः किन्नु मे सुताः'।।**[३]

चित्रं यत् स्वयमपि स्वराज्यं स्वामात्यं स्वगजं स्वकोषं विस्मर्तुमशक्तो राजा वैश्यं पप्रच्छयैरसाधुभिर्भवान् धनलोभात् परित्यक्तस्तेषां कृते भवतः स्नेहः कथं न मनो जहाति?

---

१. तदेव १.१७–१६

२. तदेव १.२२–२३

३. तदेव १.२३–२५

वैश्योऽपि विगुणेष्वपि बन्धुषु स्वीयां स्नेहपरवशतां दृष्ट्वा विमूढो राजानं प्रत्युवाच –

**'एवमेतद् यथा प्राह भवानस्मद्गतं वचः।**
**किं करोमि न बध्नाति मम निष्ठुरतां मनः' ।।**
**यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।।**
**पतिस्वजनहार्दञ्च हार्दि तेष्वेव मे मनः ।।**

**किमेतन्नाभिजानामि जानन्नपि महामते।**
**यत् प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ।।**

**तेषां कृते मे निःश्वासो दौर्मनस्यञ्च जायते।**
**करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम्' ।।**[1]

ईदृशमस्य स्नेहवशं दुःखमद्यत्वेऽपि विज्ञानविकसिते युगे नापसृतं परन्तु क्रमवर्धमानमेव दृश्यते।

अद्यापि स्नेहदुर्बलौ पितरौ पुत्रादिभिः प्रत्याख्यातौ एवमेव विलपतः। स्वात्मजनैः परित्यक्तस्य मनस्तानात्मीयान् न परित्यक्तुं शक्नोति। अतः प्रत्याख्यातस्य निर्वासितस्य जनस्यावशीभूतं मनस्तानभितः स्वगृहं प्रति च तद्गतकुशलाकुशलचिन्तया प्रधावति। एवमेव लौकिकवेदनाया अलौकिके समुत्तरणं सप्तशत्या आभूषणं भवति। अतो राजा सुरथो वैश्येन समाधिना महर्षिं मेधसमुपगतस्तं पप्रच्छ– 'कथं मनो मनुष्याणां स्वायतं न वर्तते। सर्वमपि मम राज्यं चिराय परेणाधिगतम्। तथापि मनसो मूहुर्तमपि स्वराज्यचिन्ता न बहिर्गच्छतीति चित्रम्। अयमपि वैश्यः पुत्रदारैर्धनलोभान्निर्दयं परित्यक्तस्तेषां कृते अहर्निशं सन्तापमनुभवति मनसा तान् क्षणमपि विस्मर्तुं न शक्नोति, संसारविषये महादोषं पश्यन्ती कथमावयोरेवं विवेकविमूढता' – राजोवाच –

**'भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्।**
**दुःखाय यन्मे मनसः स्वचित्तायत्तां विना ।।**

**ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि।**
**जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम! ।।**

---

१. तदेव १.३०–३४

**अयञ्च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः।**
**स्वजनेन च सन्त्यक्तस्तेषु हार्दी तथाप्यति।।**

**एवमेष तथाहञ्च द्वावप्यत्यन्तदुःखितौ।**
**दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ'।।**[1]

किमत्र कारणं येन विवेकवान् नरः स्वेच्छयैव दृष्टदोषस्य विषयस्य सन्दानतां वरयति?

**तत् केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि।**
**ममास्य च भवत्येषा विवेकान्धस्य मूढता'।।**[2]

ऋषेरुत्तरमत्रातीव सारगर्भम्, येनाद्यत्वेऽपि स्नेहसम्मूढानां जनानां निराश्वस्ते जीवने निबिडान्धकारे समुज्ज्वलति कश्चिद् ज्ञानमयो दीपः, मनोदुःखस्य महौषधं मुनेर्वचो महारोग्यं प्रयच्छति। ऋषिराह–सर्वेषां प्राणिनां रूपादिविषयज्ञानं सामान्यतो विद्यते। विषयाश्च प्राणिभेदेन पृथक्तया प्रतिभान्ति। केचिदुलूकादयः प्राणिनः दिवान्धाः केचित् काकादयो रात्र्यन्धाः केचिद् विडालादयो यथा दिवा तथैव रात्रौ तुल्यमेव द्रष्टुं समर्थाः। यत् सूत्रितं भगवत्पादेन वेदव्यासेन– 'पश्वादिभिश्चाविशेषात् तदनुसारेण यथा मनुष्यास्तथैव पशुपक्षिमृगादयस्तुल्या एव विषयज्ञा विषयाविष्टाश्च भवन्ति। परं मानुषाः सुतान् प्रति साभिलाषाः प्रत्युपकारलाभाय तान् जनयन्ति, पालयन्ति, पोषयन्ति च। पुत्रादिभिः प्रत्याख्यातास्ते तानभिशपन्ति, प्रत्याख्यातास्तैर्विमूढाः केचन विमनायन्ते दुःखेनावसीदन्ति दीर्णहृदयाः। पशवोऽपि तुल्येन स्नेहेन शावकान् वर्धयन्ति, स्वयं क्षुत्पीड़िता अपि अपत्यानां क्षुधां निवारयन्ति सर्वथा निःस्वार्थास्ते सादरमपत्यानि पालयन्ति। किन्तु विवेकिनो मनुजाः स्वार्थपरायणा प्रत्युपकारलाभाय पुत्रादीन् कामयन्ते। मुनिर्मेधा एवमाह राजानम् –

**'ज्ञानेऽपि सति पश्यैतान् पतङ्.गाञ्छावचञ्चुषु।**
**कणमोक्षादृतान्मोहात् पीड्यमानानपि क्षुधा।।**

**मानुषाः मनुजव्याघ्र साभिलाषाः सुतान् प्रति।**

१. तदेव १.४०–४४

२. तदेव १.४४–४५

**लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि' ।।**[1]

संसारिणस्तु स्वार्थबुद्धिप्रणोदिताः, अतएव पुत्रादिभिरवमानिताः प्रत्याख्याता दुर्विषहं दुःखमनुभवन्ति। अत्रैव सप्तशत्यां मेधसो मुनेरिदं लोकचरित्रोद्घाटनं विशेषतो लोकशिक्षाया उपयोगमर्हति। यत आधुनिकेऽस्मिन् युगे स्वसुखपरायणाः पुत्रादयः प्रायः पितरौ वृद्धावस्थायां स्वगृहान् निर्वासयन्ति। कुत्रचित् पित्रोः परिपालनमेकः कर्तुमनिच्छुकः अन्यैर्भ्रात्रादिभिस्तयोः प्रतिपालनव्ययविभाजनाय तयोर्वसतिमपि मासान् मासान्तरे स्वेषां मध्ये विभज्य तयोरशेषं मनःपीडां जनयति। कुत्रचित् कश्चित् पुत्रो मातुः कश्चिद्वा पितुर्व्ययमङ्गीकृत्य वार्धके जनकजनन्योरसहनीयं विच्छेदमानीय तयोर्जीवनं दुर्विषहं तयोरन्तकालं मर्मन्तुदं हाहाकारेणावसाययति। पित्रोः ऋणमिदानीमपत्येनैवं निर्दयतया परिशोध्यते। केचन पितृभक्ता अपि पुत्रा जीविकार्थमनिच्छया पितरौ त्यक्त्वा दूरदेशे वसन्ति। अतो वार्धके हताश्वासयोः स्नेहातुरयोः पित्रोर्मेधसो मुनेर्वचने श्रद्धैवावलम्बनीया। वस्तुतस्तु पुत्रादिनां यादृशो दोषोऽस्ति ततोऽप्यधिकतरदोषस्तान् प्रति अभिलाषाज्जनकजनन्योर्भवति। तेनैव पापेन तेषामयमुद्वेगकरः परिणामो दृश्यते। बृहदारण्यकोपनिषदि स्नेहस्य प्रेम्णो वा या असारतोपदिष्टा– 'न वारे पुत्रस्य कामाय पुत्रः प्रियो भवति आत्मनस्तु कामाय सः प्रियो भवति' सैवात्मकामना पित्रोरभिलाषेण सूचिता मुनिवर्येण मेधसा–'मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति'– यदि तावत् सप्तशतीशिक्षया अपत्यानि प्रति जना निरभिलाषाः कथं कथमपि भवेयुस्तर्हि तेषामिदं मर्मच्छेदकरं पुत्रादिप्रत्याख्यानजनितं दुःखं कथमपि नाभिभवेयुः। लोकशिक्षायां सप्तशत्या आवेदनमनेन हेतुना दुरापहमेव भवतिं सप्तशती यस्या मायया जानन्नपि जनो विमूढो भवति तस्याश्च दुरासदाया दुराराध्याया देव्या अलौकिकमुद्भवं यद्यपि वर्णयति अलौकिकेन महिम्ना तथापि दुष्प्रेक्ष्येयं दुर्गा दुरङ्गमा न भवति। महीरूपेणास्माकं सा देवी धारयित्री, जलरूपेण जीवनाधायिका। प्रत्यक्षभूतेयमेवमत्र प्रवन्दिता –

**'आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि।**
**अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये ।।**[2]

---

१. तदेव १.५१–५३

२. तदेव ११.४

किं च,

**'भ्रुकुटिकुटिलात्तस्या ललाटफलकाद्द्रुतम्।**
**काली करालवदना विनिष्क्रान्तासिपाशिनी।।'**[१]

इत्याद्यतिलौकिकवर्णनया या दूरङ्गमा देवी भयानका भीषणा प्रतिपद्यते सैव महीरूपेणास्माकमाधारभूता मातृरूपेण स्नेहमयी परमानन्दप्रदायिका। किं बहुना सैका सर्वकार्यविघातिनी क्षुधा, तृष्णा च मर्मद्राविणी नित्यं नित्यमयाचिता अप्रार्थिता स्वयमुपतिष्ठते। एवं लौकिकानुभवेन नित्येयमुत्पन्ना देवी प्रतिदिनमस्मानाविशति। सुरासुर–रङ्ग्रामोऽपि कदाचिन्नावसिता। अशुभशक्तिरेवासुररूपेण सप्तशत्यामवतरति, देव्याः प्रभावेण केवलं हृद्गताया बहिर्गताया वा तस्या नाशो सम्भवति। रक्तबीजकल्पा विघ्नपरम्परा अस्मानभिभवति, या च देव्याः प्रसादेन केवलमपनीता भवति। प्राकृतजनानां धर्मार्थकामाः सेव्या भवन्ति, सप्तशत्यामत्र धर्मार्थे प्रथमाध्यायगतप्रथमचरित्रजपविनियोगो महाकालीप्रीत्यर्थं निर्दिश्यते, द्वितीयाच्चतुर्थाध्यायान्तं मध्यमचरित्रस्य जपविनियोगो महालक्ष्मीप्रीत्यर्थमर्थार्थे सन्दृश्यते, आपञ्चमात् त्रयोदशाध्यायान्तं वर्णितस्य देव्या उत्तरचरित्रस्य जपविनियोगः कामार्थे महासरस्वतीप्रीत्यर्थमुपदिश्यते। मोक्षार्थमत्र देव्याश्चरित्राणां न कोऽपि विनियोगो निर्दिष्टः। अतः खलु सप्तशती चण्डी कामनापरवशानां शोकदुःखार्दितानां संसाराश्रितानां प्राकृतजनानां गार्हस्थ्यावलम्बिनां सुखसंवेदनाय विशेषतः प्रवर्तते, निस्त्रैगुण्ये पथि विचरतां सन्न्यासिनां कृते नैवास्यास्तथाभिनिवेशः संलक्ष्यते। नात्र सप्तशत्यां निवृत्तिमार्गेण एषणात्रयत्यागः कुतश्चिदुपदिष्टः। वैश्यः समाधिरत्र स्वेच्छया, न कस्यापि उपदेशेन वैराग्यमापन्नो देव्या सङ्गविच्युतिकारकं मोक्षं यद्यपि ययाचे, राजा तु सुरथो न केवलमिह जन्मनि निर्जितारिः स्वराज्यमभिललाष, जन्मान्तरेऽपि अस्खलितं राज्यं देव्या ययाचे, देवी च प्रसन्ना तत् प्रार्थनां पूरयामास। नास्य राज्ञस्तृष्णाक्षयो नाम मोक्षः कश्चिद्देव्या परितुष्टयोपदिष्टः। ऋद्धिसिद्धिप्रदायिकेयं देवी संसारसुखस्यानित्यतां नोपदिशति न वा सुखदुःखसमीकरणाय प्रबोधयति, किन्तु दारिद्र्यदुःखहारिणी सा दारिद्र्यं नाशयति, प्राकृतजनप्रार्थनया रूपं ददाति, धनं ददाति, जयं ददाति, किञ्च भार्यां मनोरमामपि पुत्रपौत्रादिभिः प्रददाति, कदापि न स्मारयति

---

१. तदेव ७.६

यौवनमनित्यम्, विषावहा विषया अवश्यं वर्जनीया इति वा सकृदपि नोपदिशति सा चण्डी। किं बहुना सततवर्जनीयः अहङ्कारोऽपि धर्मधारिण्या अनयैव संरक्ष्यते। जगति सर्वं क्षणिकं, दुःखेन जगत् ज्वलति, केशाग्रस्पर्शी वर्तते मृत्युस्तथापि प्राकृतजनानां भोगतृष्णा न म्रियते। पुनरपि कामान् वरयन्ति ते, न तु प्रव्रज्याम्। तेषामेव सुखाय सप्तशत्यां देवी चण्डिका लौकिकसुखसंवेदनेन स्वयमवतरति। लौकिकसुखास्वादजनितानन्देन सप्तशत्या लौकिकावेदन–मतएव गभीरं हृदयसुभगं मनसश्चिराय विश्रान्तिजननं भवति।

***

–डॉ० मितालीदेवः
वाराणसी

# वैदिक–श्रौतयागाः

वैदिकयज्ञः श्रौतो गृह्यश्चेति भेदेन द्विविधः। तत्र श्रौतयज्ञो वेदेन प्रत्यक्षं विहितः। श्रौतयागार्थम् आहवनीयः, गार्हपत्यः, दक्षिणश्चेति त्रयाणामग्नीनाम–पेक्षा वर्तते। एते त्रयोऽग्नयस्त्रिषु स्वतन्त्रेषु कुण्डेषु स्थाप्यन्ते। तत्र पूर्वस्यां दिशि चतुष्कोणाकारं चतुर्विंशत्यङ्गुलविस्तृतमाहवनीयकुण्डम्, पश्चिमायां दिशि गोलाकारं त्रयोदशाङ्गुलविस्तीर्णं गार्हपत्यकुण्डम्, दक्षिणास्याञ्च अर्धगोलाकारं सार्धोनविंशत्यङ्गुलविस्तृतं दक्षिणाग्निकुण्डं निर्मीयन्ते। आहवनीयकुण्डस्य मध्यस्थानाद् गार्हपत्यकुण्डस्य मध्यस्थानं यावत् षण्णवस्य– '९६' अङ्गुलव्यवधानं विधीयते।

आहवनीयगार्हपत्ययोर्मध्ये यत् स्थानं तत्र मृत्तिकयैकोन्नता एका भूमिर्निर्मीयते। इयं भूमिः वेदिः इत्युच्यते। अस्या एव वेद्याः पूर्वोत्तर–पार्श्वे मण्डलाकारमावसथ्याग्निकुण्डं पूर्वदक्षिणपार्श्वे च गोलाकृति–सभ्याग्नि–कुण्डं वर्तते।

यज्ञेषु केचन यागाः केचन होमाश्च सन्ति। तत्र यजतिशब्देन यानि कर्माणि विहितानि तानि यागा इत्युच्यन्ते। जुहोति–शब्देन विहितानि तु कर्माणि होमा इत्यभिधीयन्ते। यागे आहुतिप्रदानकाले वषट्कारेण (=वौ ३ षट्) इत्येवं होमे तु स्वाहाकारेण द्रव्यप्रदानं क्रियते। यागे आश्रावणम् (आ = ३ धा ३ वय, औ ३ श्रावय), प्रत्याश्रावणं (= अस्तु औ ३ षट्) अनुवाक्या याज्या, उपस्तरणम् = पात्रे स्रुवेण आज्यक्षारणम्, अभिधारणं = प्रदानद्रव्यस्योपरि आज्यक्षारणञ्च वर्तन्ते। अग्नौ समग्र–द्रव्यस्य त्यागो न विधीयते, अपि तु द्रव्यस्यांशविशेषस्य एव। प्रदानार्थम् उद्दिष्टद्रव्यादंशविशेषस्य खण्डनम वदानमित्युच्यते।

यजमानगोत्रानुसारेण चतुर्वारं पञ्चवारं वाऽवदानं भवति। तथा हि उक्तम् –

**जामदग्न्या वत्सविदा वार्ष्टिषेणस्तथैव च।**
**भार्गवाश्च्यवना और्वाः पञ्चावर्त्तिन ईरिताः।।** इति।

पुरोडाशे सान्नाय्यादीनां अवदानकाले इमे उपस्तरणाभिधारणे प्रदेय–द्रव्यस्य खण्डद्वयेन सह चतुरवत्ततासम्पादके भवतः। आज्यावदानस्थलेषु आज्यस्य जुह्वां चतुर्वारं ग्रहणं भवति। (अवत्तम् = अव० दो अवखण्डने + भावे क्तः) पञ्चवारमवदानं यस्यास्ति स पञ्चावत्ती। तदन्यश्च चतुरवत्ती सन्नाय्ययागे आदौ उपस्तरणं, ततः दध्नो वारद्वयम् अनन्तरं दुग्धस्य च वारद्वयमवदानं ततश्चाऽभिधारणं भवति।

होमे तु एतानि न सन्ति। आज्यस्थाल्या ध्रुवायां वा स्रुवायां जुह्वां वा आज्यं गृहीत्वा होमः कर्तव्यः 'उपाकृत्य पञ्च जुहोति' इत्यादौ आहुतिगणे स्रुवेण जुह्वा आज्यं गृहीत्वा प्रदानफाले आच्छिद्य आच्छिद्य = (विगृह्य विगृह्य) तद् आज्यम् अग्नौ होतव्यं, हुत्वा हुत्वा पृथगेव वा गृह्णीयात्। यागे तिष्ठन्नेव कुर्यात्, होमस्तु अग्निम् अपरेण भूमौ दक्षिणं जानु निपात्य कर्तव्यः। अग्निहोत्रादन्यत्र होमे समित्प्रदानं न क्रियते।

अनुष्ठानान्तर्गतेषु यागेषु यो मुख्यस्तस्य प्रधानयाग इति सञ्ज्ञा, यश्च गौणस्तस्य अङ्गयाग इति समाख्या। एकैकस्य प्रधानयागस्याऽनेके अङ्गयागा अङ्गहोमाश्च स्युः। यज्ञे चेदनेके प्रधानयागा वर्तन्ते, तर्हि प्रत्येकं प्रधानयागम् अङ्गकर्माणि न आवर्तन्ते, अपि तु समानकालत्वात् सर्वास्तान् प्रधानयागानुद्दिश्याऽङ्गकर्मणा सकृदेवानुष्ठानं भवति। एवम् अनुष्ठानं तन्त्रेणानुष्ठानम् इत्युच्यते–

**'कर्मणां युगपद्भावस्तन्त्रम्'**
**फलकर्मदेशकालद्रव्यदेवतागुणसामान्ये।'**[१]

मन्त्रब्राह्मणात्मके वेदे सर्वेषामेव यागानां सम्पूर्ण–विवरणं नोपलभ्यते। येषां यागानां समग्रं विवरणं दृश्यते ते प्रकृतियागाः, येषाञ्च अंशतो विवरणं दृश्यते ते विकृतियागाः कथ्यन्ते। विकृतियागस्य येषु विषयेषु प्रकृतियागापेक्षया वैशिष्ट्यानि भवन्ति तेषामेव विवरणं तत्र दीयते न तु समग्रस्याऽनुष्ठानस्य। वैशिष्टेभ्यः अन्यत्र विकृतियागस्य प्रकृति–यागवदेवानुष्ठानं भवति। को यागः कस्य प्रकृतिः, तद्विषये मीमांसा–शास्त्रं श्रौतसूत्राणि च अवलोकनीयानि।[२] यज्ञे एकस्य द्रव्यस्य स्थाने द्रव्यान्तरमपि

१. कात्यायनश्रौतसूत्रे, १.७.१.३

२. आपस्तम्ब–यज्ञ–सूत्रे, ३, ३१–४७; ४.२–८

क्वचिद् व्यवहर्तुं शक्यते। इदं द्रव्यान्तरं प्रतिनिधि–शब्देन आख्यायते[1]–

यज्ञे ऋग्वेदीयमन्त्राः सामवेदीयमन्त्राश्च उच्चैः पठनीयाः। यजुर्वेदीयाः प्रैषप्रवरणसंवादाश्रावणप्रत्याश्रावणमन्त्रा अपि तथैव उच्चार्याः। प्रैषप्रवरादिभिन्ना अन्ये मन्त्रास्तु (उपांशु = 'करणवदशब्दममनः–प्रयोग उपांशु) पठितव्याः।[2] सामिधेनीविषयकाणि आश्रवणादीनि मध्यमस्वरेण, सामिधेनी–भिन्नानि आरम्भत आज्यभागाभ्यां प्राक् प्रातः–सवने च यानि आश्रावणादीनि सन्ति तानि मन्द्रस्वरेण = 'सन्निकृष्टस्य जनस्य श्रवणयोग्यः स्वरो मन्द्रः।' आज्यभागादारभ्य स्विष्टकृतः प्राक् माध्यन्दिनसवने च प्रयोज्यानि आश्रावणादीनि मध्यमस्वरेण, अन्यत्र च वर्तमानानि तानि क्रष्टुस्वरेण = (क्रष्टुः, कौञ्चः, तारः स्वरः = अर्थात् दूरस्थस्य जनस्य श्रवणयोग्यः स्वरः) वक्तव्यानि। क्रष्टुस्वरेणोच्चारणकाले शीघ्रा गतिः, मध्यमे मध्यमा, मन्द्रे च विलम्बिता गतिराश्रयणीया। यज्ञकाले सर्वे मन्त्रा उदात्तानु–दात्तादिस्वरभेदमकृत्वा पठनीयाः।[3]

मन्त्रान्ते स्वाहाकारोच्चारणकाले वषट्कारोच्चारणसमये वा कर्म आरब्धव्यम्। आधारे वसोर्धारादौ च मन्त्रारम्भकाले एवं कर्मारम्भो भवति। यज्ञकाले अग्निं महावेद्यां अग्नौ अप्रणीतेऽपि तां वेदिञ्च पृष्ठतः कृत्वा कदापि न सञ्चरेत्।

## अग्न्याधानम्

वेदाध्ययनं समाप्य गुरोर्गृहात् स्वगृहं प्रत्यागत्यार्येण विवाहः कर्तव्यः। अकृतविवाहस्य यज्ञे अधिकारो नास्ति–

**न वै अपत्नीकस्य हस्ताद् देवा बलिं गृह्णन्ति।**
**अर्धो ह वा एष यज्ञस्य।**

विवाहानन्तरं श्रौतयज्ञाय यस्मै यः कालो विहितः, तस्मिन् विहिते काले आहवनीयादीनाम् अग्नीनां कुण्डेषु स्थापनं कार्यम्। इदमग्निस्थापनम–ग्न्याधानमित्युच्यते।

विवाहाग्नेः औपसनाग्निरिति सञ्ज्ञा। आधानात् पूर्वदिने ताम्

१. तदेव ३.५१–५२; कात्यायनश्रौतसूत्रे, १.४ २–१६

२. तैत्तिरीयप्रातिशाख्ये, १३.६

३. पारस्करगृह्यसूत्रे, १.२.३४

औपसनाग्मि् अर्ध–गार्हपत्यकुण्डाद् बहिः पश्चाद्भागे निधाय तत्र ब्रह्मौदनपाकः 'ऋत्विजां भोजनाय पक्मोदनं ब्रह्मौदनम् इत्युच्यते') कर्तव्यः। तस्मिन्नेवाग्नौ समिदाधानञ्च ततः कर्तव्यम्। आधानदिने सर्वप्रथमम् अरणिशब्दवाच्ययोर्द्वयोरश्वत्थकाष्ठ–खण्डयोर्घर्षणेन अग्निमुत्पाद्य सोऽग्निः गार्हपत्यकुण्डे स्थपनीयः। एतेन गार्हपत्याग्नेराधानं सिध्यति।

प्रत्येकमरणिः षोडशाङ्गुलदीर्घा द्वादशाङ्गुल–विस्तृता चतुरङ्गुलोन्न्ता (16x12x4) च भवति।[१]

गार्हपत्याग्नौ स्वकुण्डे स्थापिते सति, तस्मादेव कुण्डात् कञ्चितद् अङ्गारमुद्धृत्य अन्यस्माद् वा कस्माच्चित् स्थानादग्निमानीय सः 'अग्निः' दक्षिणान्निकुण्डे स्थापनीयः। अनेन दक्षिणाग्नेराधानं सिध्यति।

ततो गार्हपत्यकुण्डात् कञ्चिद् अङ्गारमानीय आहवनीयकुण्डे स्थापयेत्, एतेन आहवनीयाधानं सम्पद्यते। त्रिषु एव कुण्डेषु अग्निस्थापनात् पूर्वं सिकता ऊषरमृत्तिका 'ऊषाः', मूषिकोऽकीर्णा मृत्तिका, वल्मीकमृत्तिका, अशोष्यस्य जलाशस्य मृत्तिका, 'सूवः' शूकरोत्पादिता मृत्तिका 'वराह–विहतम्' शर्करा 'उपतत्त्वखण्डानि, क्षुद्रप्रस्तरा' श्चेति सप्त पार्थिवोपकरणानि, अश्वत्थकाष्ठं, उदुम्बरकाष्ठं, पलाशकाष्ठं, शमीकाष्ठं 'शाइ इति भाषायाम्' किकङ्कतकाष्ठं 'वेच इति भाषायाम्' वज्रपातितकाष्ठं पद्मपत्रञ्चेति सप्त वानवस्पत्योपकरणानि च स्थापनीयानि।

'कुण्डे अग्निस्थापनाऽनन्तरं' प्रतिदिनं गार्हपत्याग्निर्ज्वलदवस्थायां संरक्षणीया। यज्ञदिवसे अस्माद् गार्हपत्यात् कुण्डान्तरे इदं अङ्गारनयनमग्निप्रणयनमित्यभिधीयते। अग्निप्रणयनादनन्तरमन्वाधानमपि कर्तव्यम्। अन्वाधानं नाम अग्नौ काष्ठप्रदानम्।

## पवमानेष्टिः

अग्न्याधानादनन्तरमेव आहितेषु तेषु त्रिषु अग्निषु श्रौतयज्ञाः कर्तुं शक्यन्ते इति न। संस्कृतेषु एवाग्निषु श्रौतकर्माणि कर्तुं शक्यन्ते। श्रौत–कर्मार्थमग्नीनां संस्कारः कर्तव्यः। अग्निसंस्काराय तिस्रः पवमानेष्टयः अनुष्ठेयाः। तिसृषु इष्टिषु यथाक्रमम् अग्निः पवमानः अग्निपावकः अग्नि–शुचिश्च प्रधानदेवताः। सर्वत्र अष्टसु कपालेषु संस्कृतः (पक्वः)

१. 'अश्वत्थाच्छमीगर्भादरणींमहरेद्' – आश्वलायनश्रौतसूत्रे २.१.१५

पुरोडाशः प्रदानद्रव्यम्। अग्न्याधानदिवसे संवत्सरमध्ये निर्दिष्टे दिवसे वा इमा इष्टयः समानतन्त्रेणानुष्ठेयाः।

## अग्निहोत्रम्

अग्निहोत्रहोमार्थं यदग्न्याधानं तद् होमपूर्वाधानम् इति कथ्यते। होमपूर्वाधानपक्षे यस्मिन् दिवसे आधानं पवमानेष्टयश्चानुष्ठीयन्ते तस्मिन्नेव दिवसे सायमग्निहोत्रास्यापि आरम्भः कर्तव्यः। एतत्–पक्षे अग्निहोत्रात् पूर्वं कोऽपि अन्यः श्रौतयज्ञो नाऽनुष्ठीयते। यत्रादौ दर्शपूर्णमासेष्ट्या श्रौतकर्मारम्भः तत्–पक्षे यदाधानं क्रियते, 'तदिष्टिपूर्वाधानमित्युच्यते'। आदौ सोमयागमेव करिष्यामि, ततोऽन्यान् यागान् इति सङ्कल्प्य यत्र आधानं क्रियते, तत्र तत् 'सोमपूर्वाधानामित्यभिधीयते।

होमपूर्वाधानपक्षे अग्न्याधानानन्तरं प्रतिदनिं सायं प्रातश्चाऽग्निहोत्र–मनुष्ठोयम्। सायम् अग्निः, प्रजापतिश्च, प्रातश्च सूर्यः, प्रजापतिश्च क्रमेण देवताः। आहुतिद्रव्यं सर्वत्र दुग्धम्। सायं सूर्ये अस्तङ्गते, प्रातश्च सूर्योदयात् पूवमग्निहोत्रमनुष्ठेयम्।

बह्वृचशाखीयाः छन्दोगाः, कात्यायनानुगाश्च सूर्योदयात् पूर्वमेव अग्निहोत्रहोममनुतिष्ठन्ति। अतस्तेषां 'अनुदितहोमिनः' इति सञ्ज्ञा। कठशाखीयाः, तैत्तिरीयशाखीया मैत्रायणशाखीयाश्च 'एते सर्व एव कृष्ण–यजुर्वेदीयाः, सूर्योदयात् परमग्निहोत्रमनुतिष्ठन्ति। अतस्ते उदितहोमिन इत्याख्यायन्ते।

अग्निहोत्रार्थं गां दुग्ध्वा दुग्धं कुम्भ्यां गृहीत्वा कुम्भस्थं तद् दुग्धं गार्हपत्याद् गृहीत्वा कुण्डाद् बहिः स्थापितेषु अङ्गारेषु सन्तापनीयम्। सन्तप्तं दुग्धं स्रुवेण अग्निहोत्रहवण्यां चतुर्वारं ग्रहणीयम्। ततो गृहीतं तद् दुग्धं आहवनीयाग्नौ एकस्यै देवतायै प्रदाय पुनरनेनैव प्रकारेण दुग्धं गृहीत्वा अपरस्यै देवतायै तथैव आहुतिप्रदानं कार्यम्। इत्थं सायं प्रातश्चाग्निहोत्रम–नुष्ठीयते।

## दर्शपूर्णमासो यागः

श्रौतयागा इष्टियागः, पशुयागः, सोमयागश्चेति भेदेन त्रिविधा भवन्ति। तत्र शस्यद्रव्येण क्रियमाणो याग 'इष्टियाग' इत्युच्यते। यत्र पशुं निहत्य निहतस्य पशोः अङ्गैः यागोऽनुष्ठीयते स पशुयाग इति व्यपदिश्यते। सोमरसप्रदानं एव यत्र मुख्यमनुष्ठानं स सोमयाग इत्याख्यां लभते।

सर्वेषामिष्टियागानां दर्शपूर्णमासावेव प्रकृतिः। दर्शपूर्णमासयोः दर्शेष्टिः पौर्णमासेष्टिश्चेति इष्टिद्वयं वर्तते। तत्र पूर्णिमायां कृष्णप्रतिपदि च पौर्णमासेष्टिः अमावस्यायां शुक्लप्रतिपदि च दर्शेष्टिरनुष्ठीयते। पौर्णमासेष्ट्या एव दर्शपूर्णमासयोः प्रारम्भो भवति।

पौर्णमासेष्टौ क्रमेण अग्निः, विष्णुः, 'प्रजापतिः, अग्नीषोमौ वा' अन्नीषोमौ च प्रधान–देवताः। तत्र द्रव्याणि यथाक्रमम् अष्टाकपालः पुरोडाशः, आज्यम्, एकादशकपालः पुरोडाशश्च। दर्शेष्टौ पुनः अग्निः, विष्णुः, 'असोम–याजिनाम्' इन्द्रश्च प्रधान–देवताः। तत्र द्रव्याणि क्रमेणः अष्टाकपालः पुरोडाशः, आज्यम्, द्वादशकपालः, पुरोडाशश्च।

सोमयाजिनामाधानानन्तरं यैः सोमयाग एवादौ अनुष्ठीयते, तेषां तु अग्निरिन्द्रश्च दर्शेष्टौ देवताः यथाक्रममष्टाकपालः पुरोडाशः, दधि, दुग्धं च द्रव्याणि। अग्नौ प्रदानकाले दध्नो दुग्धस्य च सह प्रदानं भवति। मिलितयोर्दधिपयसोः 'सान्नाय्यम्' इति सञ्ज्ञा। सर्व एव इमे प्रधान–यागाः, तन्त्रेण प्रयोज्याः। सर्व एव इमे प्रधानयागाः, अङ्गयागाश्च प्रतिपदि एवानुष्ठीयन्ते।

पूर्णिमायाममावस्यायाञ्च केवलं यागाय सङ्कल्पो द्रव्यसङ्ग्रहश्च क्रियते। अमावस्यायां प्रातः बहुपत्रोपशाखा–विशिष्टायाः शमीशाखायाः पलाशशाखाया वाऽहरणमपि क्रियते। अनया शाखया गोवत्सा गोभ्यः पृथक्–क्रियन्ते। इदं पृथक्करणं 'वत्सापाकरणम्' इत्युच्यते। गावः सञ्चरणार्थं क्षेत्रं प्रति प्रेर्यन्ते। अपराह्णे अमावस्यायामेव स्वर्गतान् पितृपुरुषान् उद्दिश्य पिण्डपितृयज्ञोऽनुष्ठीयते सायं क्षेत्राद् गोषु यजमानगृहं प्रत्यागतासु तासां दोहनं कार्यम्। ततो दुग्धं पयः सन्ताप्य तत्राऽत्यल्पदधिनिक्षेपः कर्तव्यः। दधिनिष्पादनाय पयसि अयं दधिनिक्षेपः आतञ्चनमिति कथ्यते। आतञ्चनेन निष्पन्नं दधि परे द्युः प्रधानयागे व्यवह्रियते। प्रधानयागीय–दुग्धाय इन्द्रदेवताकदुग्धाय शुक्लप्रतिपदि प्रातः पुनर्वत्सापाकरणं दोहनञ्च कर्तव्ये।

चातुर्मास्ययागः, वैश्वदेवपर्व, वरुणप्रघासपर्व, शुना–सीरीपर्व, पाशुक–चातुर्मास्य, सौमिक–चातुर्मास्य, नवान्नेष्टिः, पशुयागः, सौत्रामणीयागः, सोमयागः इत्यादीनां विविध–यागानां विशद–विस्तृत–विवरणं यज्ञतन्त्रसुधानिधौ तथा क्रतुरत्नमालायां विस्तरेणोपलभ्यते। अधुना सङ्क्षेपेणाऽस्मिन्निबन्धे युज्यत इत्यलं विस्तरेण।

***

प्रो० ओम्प्रकाशपाण्डेयः
लखनऊ

# केलि–सखी

शिवापाङ्गदृष्टिप्रदग्धो विदेहः स्मरोऽद्यापि जागर्ति सर्वेष्वजस्रम्।
कला–कौशले ज्ञानविज्ञानयोर्वा कवित्वप्रपञ्चेऽपि तस्यैव योगः।।१।।

क्वचिद् धर्मवृत्त्या जनैः सेव्यमाना मनोजन्मनः केलि–लीला–प्रवृत्तिः।
समुल्लासयन्ती रसं राजते यं परानन्दकल्पं जनास्तं वदन्ति।।२।।

ततो जायते दैहिकी मानसी वा गृहस्थेषु चैतादृशी कापि तुष्टिः।
यया वर्धते सत्कुलं सन्ततिर्वा समभ्येति सांसारिणी जीव–यात्रा।।३।।

अनङ्गो भवत्येष साङ्गो मनस्सु शिवेनार्धनारीश्वरेणेक्षितश्चेत्।
जगद् भासते पार्वतीयुक्तमेतन् महेशस्वरूपं चिदानन्दरम्यम्।।४।।

परं मन्मथ–प्रेरिताः केचिदेते जनास्तादृशो ये परित्यज्य धर्मम्।
कुरङ्ग–प्रवृत्त्या सुखान्वेषिणस्ते विमूढा इतो वा ततो विभ्रमन्ति।।५।।

तृषार्तो मृगो वाञ्छया नीरराशेर्गतो, वीक्ष्य शुष्कं सरः सैकतं च।
यथा वञ्चिते मन्यते स्वं तथैषा विकारप्रवृत्ता रतौ संप्रसक्तिः।।६।।

जना अकामामपि कन्यकां ये प्रसह्य भोगाय नयन्ति तल्पम्।
नराधमेभ्यः पशवोऽपि तेभ्यः प्रशंसनीया न बलाच्चरन्ति।।७।।

स्वदारसीमानमपि प्रशस्तं विलङ्घ्य ये रूपपिपासयेह।
इतस्ततः क्षेत्रमनुप्रयन्तः परस्य, भोगाय विगर्हणीयाः।।८।।

बभूव सद्वंशगतोऽपि कश्चिद् युवा स्वरूपेण सुदर्शनीयः।
निरीक्ष्य धीमन्तमिमं युवानं कुटुम्बिनो हर्षनिमग्नचित्ताः।।९।।

सुशिक्षकस्तस्य पिताभिजातो गुणानुरक्ताश्च कुटुम्बिनोऽन्ये।
स्ववित्तकार्श्येऽपि तमात्मजं ते सुविद्ययाऽऽभूषितमेव चक्रुः।।१०।।

रुचिप्रकर्षेण 'मनोज' सञ्ज्ञो युवापि भैषज्यविधिप्रवीणः।
बभूव शीघ्रं स्वगुरुप्रदिष्टश्चिकित्सकः साधु कुशाग्रबुद्धिः।।११।।

स्वविश्वविद्यालयसंस्थितोऽयमवाप नैपुण्यमथ प्रयोगैः।
चिकित्सया रोगनिदानकार्यैस्तथौषधीनामपि नव्यकल्पैः।।१२।।

अनन्तरं साधु समर्ज्य दाक्ष्यं तथैव शल्यक्रियया मनोजः।
अवाप लोकप्रियतामनन्यां सुहृत्सु रुग्णेषु चिकित्सकेषु।।१३।।

ततः समासाद्य पदं वरिष्ठं चिकित्सकस्यैव पुरान्तरेऽपि।
भिषग्वरः साधु समागतोऽयं विशिष्टरुग्णालय एव दिष्ट्या।।१४।।

प्रयाति लोकः स्वयमेव तत्र प्रचोदितोऽदृष्टफलानुबन्धैः।
प्रतीक्षते यत्र नवोपसर्गैः क्रिया प्रिया वा नियतिस्तदीया।।१५।।

स्ववर्णजातां धन–धान्यपूर्णां निरीक्ष्य कन्यामपि काञ्चिदेकाम्।
कुटुम्बिभिस्तस्य कृतो विवाहस्तदैव शीघ्रं स्वहितानुरूपः।।१६।।

विवाहिता तस्य सुधर्मपत्नी न मेनका नापि बभूव रम्भा।
तथापि पत्युर्निखिलां सपर्यां विधातुमेषा यतते स्म लक्ष्मीः।।१७।।

इयन्न नाम्नैव बभूव लक्ष्मीः स्वकर्मभिश्चापि तथैव भक्त्या।
वितन्वती सर्वसुखं श्रियञ्च स्वकान्तगेहे गृहिणीत्वमाप्ता।।१८।।

सुखेन गार्हस्थ्यविधौ तयोस्तु गतानि वर्षाणि कियन्ति सम्यक्।
उदेति पुष्पं च फलं तथेति क्रमेण जाता तनया प्रियाऽपि।।१९।।

अनन्तरं कामपि वीक्ष्य धात्रीं मधुस्मितिस्निग्धसरूपरम्याम्।
सुचारुनेत्रीं युवतीं नियुक्तां स सन्निधौ मुग्धमना बभूव।।२०।।

रतिस्वरूपा 'रति' नामधेया निरन्तरं रुग्णजनान् हसन्ती।
समन्ततः सा परिचर्यमाणा चकर्ष केषां न मनांसि तत्र।।२१।।

कटुक्ववणन्तीमपहाय वाचं सुदीर्घ–नीलोत्पल–लोचनाभ्याम्।
अजस्रमेषापि समालपन्ती निरामयाँस्तत्र चकार रुग्णान्।।२२।।

इयं सदुक्तिर्लभते न रुग्णस्तथौषधैराशु रुजो विमुक्तिम्।
यथाऽयमारोग्यमुपैति शीघ्रं सपर्यया साधु मधुस्मितैश्च।।२३।।

यदा–कदा सैव मनोजकक्षे विमर्शहेतोर्निजकृत्यजाते।
समागता तस्य मनोज्ञरूपा जहार चित्तं मृदु–मन्दहासैः।। २४।।

शनैः शनैस्तस्य मनोऽभवत् तद् वशीकृतं पूर्णतया तयैव।
वशंवदस्यास्य रतिप्रभावादभूदकस्माच्च गृहे विरक्तिः।। २५।।

स्वपन् स्वपत्न्या सह बाहुबन्धे व्यचिन्तयद् देहलतां स धात्र्याः।
विसङ्गतिस्तस्य समागमेऽस्मिन् ह्यदर्शि, भिन्नं तु मनः शरीरात्।। २६।।

कदाचिदस्य प्रियसङ्गिनी या युनक्ति शय्यासुखमप्यवाच्यम्।
अभूच्च तस्मै गृहिणी सखीव प्रिया सुखे दुःखमयी च दुःखे।। २७।।

प्रियंवदा सैव सुभद्रभार्या ततो बभूवाप्रियदर्शिनीव।
वितन्वती कामसुखं यथेष्टमभूत्ततोऽस्मै हिमखण्डतुल्या।। २८।।

यथाक्रमं तस्य मनोविरागोऽवृधत् कुवित् किञ्च पतिव्रतायाः।
अभावि पत्नी विषवल्लरीव प्रिया सुताऽदर्शि न सुप्रियैव।। २९।।

गृहं सुरम्यं गृहिणीव कष्टप्रदं ततस्तं तुदति स्म किञ्चित्।
प्रसूनपात्रेषु प्रफुल्लपुष्पैरवाप सोऽयं न पुरेव हर्षम्।। ३०।।

प्रतिक्षणं तस्य मनस्यतिष्ठद् रती रतेरिव सुलोचनन्तत्।
मधुस्मितिश्चैव मुखस्य तस्याश्चकार चित्तं नितरामशान्तम्।। ३१।।

वपुर्विनिद्रं च मनोऽनुरक्तं बभूवतुर्द्वेऽपि, मनोभवेन।
कृतेन रागेण च तन्नवेन स्वकार्यवैरस्यमपि प्रजातम्।। ३२।।

गृह–व्यवस्थार्थमुपस्करं चेद् गृहे समानेतुमयं कदाचित्।
स्वजाययाऽभ्यर्थित एव रुष्टोऽब्रवीदवाच्यानि वचांसि सद्यः।। ३३।।

विभूषयन्नेव ततः स्वपत्नीमसंसदीयैरपशब्दपुष्पैः।
सुकोमलां तामपि कन्यकां स्वामकारणं तर्जयते स्म रुष्टः।। ३४।।

पुरा चिकित्सालय एव रुग्णानमंस्त यः स्वप्रभुतुल्यभूतान्।
स एव तानौषधसंविधानेऽधुना निदानेऽपि तिरश्चकार।। ३५।।

सुलब्धया सात्त्विकधर्मपत्न्या न तस्य तृष्णापि शमं जगाम।
अचिन्तयच्चैव यथा स तुष्टिं न सुन्दरी सा सुलभा तदानीम्।। ३६।।

मनः स्थितावेव जनः किमस्यां क्षमः प्रयत्नैरपि तत्त्वमाप्तुम्।
स शीघ्रमेवैति मनोविषादं ततः स्वतो गच्छति चावसादम्।। ३७।।

निवृत्तिमाप्तुं स ततो विषादात् स मद्यपानाय समुत्सुकोऽभूत्।
कुमित्रसंसर्गमवाप्य तस्मिंस्तथा विकाराश्च परेऽपि जाताः।। ३८।।

प्रसन्नतां सोऽनुययौ कदाचिन्निरीक्ष्य धात्र्या रुचिरां सुदृष्टिम्।
निशम्य चाऽस्या मधुरप्रियाणि वचाँस्यसौ हृष्टमुखो बभूव।। ३९।।

रामं यदैतन्न शशाक लब्धुं तदा चलच्चित्रमसौ ददर्श।
समागमाश्लीलरतिप्रसङ्गैर्मनोविनोदाय स चेष्टते स्म।। ४०।।

असौ चलच्चित्रमपि प्रपश्यन्नमंस्त तस्याभिनये नियुक्ताम्।
सुनायिकामेव 'रति'–स्वरूपामनिन्द्यसौन्दर्यनिधानभूताम्।। ४१।।

अकल्पयच्चैव स नायकत्वे स्वमेव तारुण्यगुणानुरूपम्।
विभिन्नदृश्येषु रतीश–लीला प्रसक्तमात्मानमसावपश्यत्।। ४२।।

यथा–यथा पश्यति चित्रमध्ये प्रगाढप्रेम्णोऽभिनयं द्वयोश्च।
तथा–तथाऽऽश्लेष–विलासदृश्यं स चिन्तयत्येव रतिं विमृश्य।। ४३।।

भविष्यगर्भेऽपि रतिप्रसङ्गे विचार्य साफल्यमथाधिगन्तुम्।
स मन्यते तान्निजधर्मपत्नीमथान्तरायन्निजलक्ष्यसिद्धौ ।। ४४।।

इतस्ततो नायक–नायिकानां निशम्य शास्त्रोक्तविभिन्नभेदान्।
असौ रतिं पश्यति पद्मिनीव सुधर्मपत्नीं करिणीव हेयाम्।। ४५।।

मुख–प्रलेपानपि दन्तचूर्णं सुफेनलादीनि च विक्रयाय।
प्रयुक्तविज्ञापनदृष्टनारीमुखानि शंसन्ति यथा युवानः।। ४६।।

तथैव वाञ्छँश्च चिकित्सकोऽयं स्वधर्मपत्नीमपहाय शीघ्रम्।
प्रियान्नवां प्राप्तमिमां हि धात्रीं बभूव विक्षिप्तमतिर्नु किञ्चित्।। ४७।।

गृहे, परीवर्त्य पुरातनानि यथा जनः पित्तलनिर्मितानि ।
प्रयुक्तपात्राणि, नयन्नवानि महानसं किञ्च नवं करोति ।। ४८ ।।

यथा सभाकक्षगता विवर्णास्तिरस्करिण्यः परिवर्तनीयाः ।
अचिन्तयन् सोऽपि तथैव पत्नीं पुरातनीं तत्र समाप्तशोभाम् ।। ४६ ।।

अहर्निशं स व्यथितोऽनुरागं न वक्तुमापारयति स्म धात्रीम् ।
असाहसे श्रीर्न वसत्युपायं ततः कमप्येव विचिन्त्य जोषम् ।। ५० ।।

दिनं यदुक्तं प्रणयाय वर्षे महर्षिणा ख्रीष्टमतस्य तस्मिन् ।
दिने समादाय महार्घमेकमुपायनं स प्रददौ च तस्यै ।। ५१ ।।

विकीर्य पीयूषमयीं स्मितिं सा विलोक्य सुस्निग्धदृशा कथञ्चित् ।
उपायनं साधु विनीय तस्मादभिव्यनक्ति स्म निजाभिलाषम् ।। ५२ ।।

इत्थं तयोर्मध्यभुवि प्रजज्ञे समानुरागस्य नवाङ्कुरोऽयम् ।
परस्परं प्रेमरसप्रसिक्तो विवर्धमानः कुसुमैः सपत्रैः ।। ५३ ।।

अभावग्रस्तेऽपि कुले प्रजाता रतिर्बभूवाप्रतिमेव नारी ।
उदेति पद्मं भुवि पङ्कनीरे सदुक्तिरेषा वितथा न लोके ।। ५४ ।।

बृहत्कुटुम्बे तनया–बहुत्वं तथा समाजस्य हि लोभवृत्तिः ।
पितुर्धनाभाववशादशक्तिर्न पाणिदानं प्रबभूव तस्याः ।। ५५ ।।

कुटुम्बसंपोषणकार्यजाते पितुर्भवेत् काचन वित्तपूर्तिः ।
अतः स्वशिक्षामपलभ्य सेवामवाप सा रुग्णजनोपचारे ।। ५६ ।।

विवाहसंस्कारगता दुराशां विहाय तत्रापि रुचिं स्वकीयाम् ।
समर्पिताऽऽरोग्यविधानकृत्ये रतिश्चिकित्सालय एव व्यस्ता ।। ५७ ।।

स्वजीवनं यापयति स्म सम्यक् चिकित्सकादेशमनुस्मरन्ती ।
रतिस्तदा तत्र प्रसन्नचित्ता सदाऽऽतुरेभ्यो विततान हर्षम् ।। ५८ ।।

अपारसौन्दर्यसमन्वितं तद् वपुश्च तस्या व्यवहारदाक्ष्यम् ।
अनिन्द्यतारुण्यगता च सुश्रीः समन्ततो लम्पटपुङ्गवाश्च ।। ५६ ।।

तथेदृशीं कामपि वीक्ष्य नारीं द्विरेफवृत्तिव्यवसायदक्षाः।
नराश्चतुर्दिक्षु परिभ्रमन्तः प्रसह्य पाशान् ननु विक्षिपन्ति।। ६०।।

रतिर्व्यजानाद्धि जन–प्रवृत्तिं तदेदृशीं साधु निसर्गबोधात्।
तथानुभावादपि सम्मुखस्थप्रसङ्गिनः स्वानुभवाच्च दीर्घात्।। ६१।।

कथन्निषेध्योऽयमयत्नतोऽपि, विना कठोरैरपि शब्दबन्धैः।
इदं स्वतो वेत्ति च कापि नारी भवेदियन्नापि सुशास्त्रविज्ञा।। ६२।।

विवेद सा सर्वजनीनकार्ये परिभ्रमन्ती पुरुषं प्रवृत्तिम्।
कथन्नरो वाञ्छति निगृहीतुं कुमारिकां का तरुणीमनूढाम्।। ६३।।

परं न सा काचन ब्रह्मचर्यव्रतव्यवस्थामधिगम्य साध्वी।
न संयमस्थैव तपोवनस्था, बभूव सामान्यसुदर्शना स्त्री।। ६४।।

यदा–कदाऽस्या अपि भावनानां सुकोमलानां हृदि जागरोऽभूत्।
कदाचिदस्यामपि कामवृत्तेर्विवर्तनं प्रादुरभावि तूष्णीम्।। ६५।।

स्ववासनानिग्रहणाय धात्री न कष्टसाध्यान् नियमान् बभार।
निसर्गजां तामधिगम्य जन्तोः शरीरवृत्तिं ननु मन्यते स्म।। ६६।।

विवाहलब्धः पुरुषो न तस्या बभूव पार्श्वे प्रियसङ्गमाय।
रतिर्ययौ तुष्टिमिमां तदानीं यदा–कदा लब्धजनेन सार्धम्।। ६७।।

निबद्धजन्तुप्रतिमः प्रधावन् कथन्नरो याति वशंवदत्वम्।
रतिर्मनस्तत्त्वविधिप्रवीणा बुबोध सम्मोहन–मन्त्र–तन्त्रम् ।। ६८।।

अतो मनोजस्य नवाभिलाषस्सहानुरागेण नवो न तस्यै।
विनीय सा चञ्चलनेत्रमीषत् तदुत्तरं साधु ददौ च तस्मै।। ६९।।

गृहे मनोजस्य नवप्रियाया नवप्रवेशोऽपि सहायिकेव।
बभूव, मान्यातिथिरेव तस्मिन् गृहे सुपत्न्याश्च सखीत्वमाप्ता।। ७०।।

शनैः शनैः सन्निधिरप्यवर्धद् द्वयोर्मिथः किञ्च समग्रदृष्ट्या।
प्रवर्तते प्रेममनोऽभिलाषात् शनैरिदं देह–धरातलेऽपि।। ७१।।

चिकित्सकोऽधावत् सद्य एव रतेर्गृहं कार्यविमुक्तिमाप्य।
प्रतीक्षमाणा सुतरामतिष्ठत् सुसज्जिता यत्र नवप्रियापि।। ७२।।

श्रुता मृगीणां मृगया किरातैर्वने श्वभिः सार्धमनुप्रयद्भिः।
परं शरव्योऽत्र सुलुब्धकोऽभूत् स्वयं हरिण्येति विचित्रयोगः।। ७३।।

धनुर्विनिर्माय निजभ्रुवाभ्यां स्वनेत्रयोरेव शर–प्रपातैः।
विभाववीतंकृतप्रयोगैर्बबन्ध लक्ष्यं हरिणी भुजाभ्याम्।। ७४।।

प्रदीयते वारिगृहागतेभ्यो विचिन्त्य रीतिं च रतिस्तथेति।
निजाधरेणैव मधु प्रकल्प्य ददौ स्वनेत्राम्बुगतार्घ्यमस्मै।। ७५।।

अजस्रदुःखार्णवमभ्युपैति नियन्त्रितो बन्दिगृहेषु कोऽपि।
परन्तदेतौ सुखिनावजस्रं बभूवतुः प्राप्य भुजानुबन्धम्।। ७६।।

रतावधान्यं विपरीतकृत्यं भृशं सुरस्यं भवतीति गोप्यम्।
अनार्यमन्यत्र यदेव चोक्तं सुखप्रदं केलिषु बोभवीति।। ७७।।

निशीथकालेषु सुखं शयाना स्वकान्ततल्पेषु च सङ्गमाय।
समुत्सुकाऽऽनन्दमावाप्तुमेषा रसाऽऽतुरादर्शि न धर्मपत्नी।। ७८।।

रतिप्रसक्तापि ददाति पत्यै न सा क्रियाभ्योऽनुमतिं च याभ्यः।
करोति कृत्यानि च तानि दृष्टा स्वकेलिमित्रेण सहाप्यनूढा।। ७९।।

अथोच्यते केलि–कला सुविज्ञैरवाप्यते तत्र सहस्रकृत्वः।
रतिप्रहर्षो विपरीतरत्यै यदोत्सुका स्त्री पुरुषत्वमेति।। ८०।।

पतिं तथोढा निजदेवतुल्यं सदैव पूज्यं ननु मन्यमाना।
रतिप्रसङ्गेष्वपि धर्मवृत्त्या न मुक्तसङ्गाय समुद्यताऽऽस्ते।। ८१।।

रतीव योषिच्च सखीत्वमाप्ता न सङ्कुचत्येव विलासलास्ये।
परप्रहर्षं वितनोति तल्पे रतिप्रसङ्गेषु समत्वलाभात्।। ८२।।

अपूर्वमेतच्च सुखं तदस्याः सुसन्निधौ सर्वविधः सुलभ्यम्।
बुभुक्षितोऽभुङ्क्त रतिप्रसादाच्चिकित्सको मुग्धमना यथेष्टम्।। ८३।।

अदर्शि सा केलिसखी प्रसन्ना सुसज्जिता स्मेरमुखी कदाचित्।
समुत्सुकोऽयं परिणेतुमेतां स्वकामनां चारुपदैरवोचत्।। ८४।।

त्वमेव मे भामिनि! सुप्रियाऽसि, त्वमेव मे सङ्गसुखप्रदाऽसि।
तवैव वासो हृदि साम्प्रतन्मे, त्वमेव सर्वस्वमतः प्रियेऽसि।। ८५।।

समाह्वये त्वामहमद्य दृष्टः सुसाहचर्यायविवाहरीत्या।
क्वचिन्मठे वाऽस्तु सुमन्दिरे वा तदावयोः साप्तपदीनसख्यम्।। ८६।।

अथार्थनां तस्य निशम्य शान्त्या विहस्य सा मन्दमुवाच चेत्थम्।
त्वया यदुक्तं न सुशोभते तद् वयः प्रकर्षादधुनाऽऽवयोर्हि।। ८७।।

गृहे च ते तिष्ठति धर्मपत्नी विवाहिता कान्तपरायणापि।
विहाय बाल्यं तनया प्रियापि नवश्रिया यौवनमभ्युपैति।। ८८।।

विनैव विच्छेद–विधिं, विधानान् न सम्भवत्येव पुनर्विवाहः।
अतो विवाहाय न साहमत्यं ददाति तुभ्यं तव केलिनारी।। ८९।।

निशम्य तस्या मधुतिक्तवाचं क्षणं तथास्थोऽपि विषण्णचित्तः।
ददर्श तां तत्र यथोत्तमर्णं प्रतारितः खिन्नमना विपश्यति।। ९०।।

ततः समागम्य गृहेऽवसन्नो दिनत्रये नैव जगाद किञ्चित्।
अनन्तरं तान्निजधर्मपत्नीं विवाह–विच्छेदविधिं ववाद।। ९१।।

निशम्य पत्युर्विषदिग्धवाचं पतिव्रता सा सपदि प्रयाता।
अगाधमुर्च्छां हरिणीव विद्धा स्वपालकस्यैव गृहे शरेण।। ९२।।

ययौ पतिः पूर्ववदेव रुग्णालयं यदा हृष्टमना कथञ्चित्।
ततः समागम्य सुता स्वमातुर्विलोक्य मूर्च्छां विललाप दीना।। ९३।।

यथा–तथेयं तनया–प्रयत्नैरलब्धसञ्ज्ञामपि दुःख–सिन्धौ।
विगाह्यमाना ननु धर्मपत्नी कटु–प्रसङ्गस्मृतिराशि–रूपे।। ९४।।

विचिन्तयन्ती निजजीवने सा सुखानि दुःखानि समागतानि।
विवाह–विच्छेदभयं विमृश्याऽभवत् पुनश्चैव विमूर्च्छितेव।। ९५।।

लतेव मुक्ता तरु–साहचर्यात् स्वजीवनं नेष्यति कुत्र लक्ष्मीः।
कथं विवाहो भविता सुताया भविष्यमाशोच्य विषादमाप्ता।। ९६।।

गृहं निवृत्तः स पतिः पुरस्तान्यधत्त पार्थक्यविधिं हि तस्याः।
प्रदर्शयँश्चैव भयं तदानीमियेष तस्याः किल साहमत्यम्।। ९७।।

ततो ह्यकस्माच्च समुत्थिता सा स्वधैर्यमालम्ब्य बलं च दार्ढ्यम्।
तमब्रवीदेव सुकातराक्षी वचो विनिश्चित्य मृदु स्वरेण।। ९८।।

'बिभेमि ते नैव निपीडनेन, न मृत्युना चान्यभयेन किञ्चित्।
हितं कुटुम्बस्य विचार्य सम्यक्, शृणोतु यद् वच्मि नयेन युक्तम्।। ९९।।

'त्वयोक्तविच्छेदविधेरिदानीं समुद्यताहं च समर्थनाय।
ममानुबन्धोऽपि तदर्थमेकः प्रसीद, निर्वाह्य लभस्व हीष्टम्।। १००।।

नवाप्रिया ते प्रददातु पत्रं निजाक्षरैरेव विलिख्य पूर्वम्।
'प्रतिश्रुता पाणिनिपीडनाय त्वया समं साऽद्य समर्पितेव।। १०१।।

'सुतां प्रियाख्यामपि चास्मदीयां स्वकुक्षिजातामिव मन्यमाना।
विहाय सापत्न्यगतप्रभेदं प्रतिश्रुता वर्धन–पोषणाय।। १०२।।

'इमौ सुवृद्धौ पितरावशक्तौ, न शक्नुतः सञ्चरणाय किञ्चित्।
इमौ सकुल्याविव मन्यमाना प्रतिश्रुता सा प्रतिपालनाय।। १०३।।

'कुलक्रमाप्ता विविधा विशिष्टाः परम्पराः काश्चन धर्मनिष्ठाः।
त्यजन्ति या नैव सुवंशवध्वः प्रतिश्रुता ताः किमु रक्षणाय।। १०४

अङ्गीकरोति यदि सा हि नवप्रिया ते ह्येतं पवित्रमनसा सकलानुबन्धम्।
सत्यं ब्रवीमि, भगिनीमिव तां सपत्नीं प्रीत्या सहर्षमिह साधु समाहरिष्ये।। १०५।।

श्रुत्वा वचांसि विशदानि च धर्मपत्न्याः रुष्टोऽपि मार्गमपरं न विलोक्य कान्त।
प्रष्टुं जगाम पुनरेव नवप्रियां स्वां प्रश्नानिमान् निज भविष्यसुखं चरिष्णुः।। १०६।।

प्रीता प्रसन्नवदना च सखी तदीया वार्तान्निशम्य सकलाञ्च विहस्य किञ्चित्।
प्रोवाच तं स्वरतिकेलिसखायमित्थं 'वाच्यम्मया किमधुना न विचिन्तयामि। १०७।।

यद् यन् मिथः समभवद्धि तदावयोर्नु जानासि नूनमखिलं मम केलिबन्धो।
नाहं विवाहविषयेऽपि विचिन्त्य किञ्चित् जाता तव स्मरकलासु सखीत्वमेव।।१०८।।

सत्यं तदेव यदहं तव केलि–मैत्रीं प्राप्ता स्वदेहगतवासनयानुनीता।
लब्धुं कदाचिदपि ते गृहिणीत्वमिष्टं नासीत् सखे! त्वमपि वेत्सि, मनोगतम्म।।१०६।।

शक्नोति नैव तव केलि–कलासु कान्ता प्राप्तुं त्वदीयगृहिणीगतगौरवन्तत्।
संवर्धते परिकरश्च कुलञ्च येन वंशक्रमादभिचरन्ति स वृत्तयोऽपि।।११०।।

आकस्मिकी भवति केलि–सखी च काचिद् रत्यै, न सैव पदमर्हति धर्मपत्न्याः।
जायैव भाति सदने कुलगौरवाय चास्मादृशी कतिपयक्षणयापनाय।।१११।।

सुप्ताहमस्मि बहुभिर्युवभिश्च पूर्वं सार्धं न वेद्मि युवकानपि तानिदानीम्।
त्वन्नासि चाद्यपुरुषो मम जीवनेऽसिमन् बद्धा ममापि नियतिर्न भवादृशैव।।११२।।

पुण्यैः प्रयन्ति वनिता गृहिणीत्वमेतत् तच्चापि नष्टुमधुना न समुद्यतास्मि।
खिन्नं विलोक्य वदनं तव धर्मपत्न्याः खिन्नां तथैव तनयां, भवितास्मि खिन्ना।।११३।।

जानामि चैव तदिदं तव धर्मपत्न्या एषा सखी भवति सम्प्रति सापराधा।
तस्याः सुकान्त–विभवं बहुधाऽपहार्य शक्ताहमस्मि नहि लब्धुमथ क्षमां वा।।११४।।

जाने तथापि गृहिणीत्वमवाप्य नार्यो दृष्टा उदारहृदयाश्च विवेकयुक्ताः।
ताः सागसं पतिमपीह ततः सपत्नीं दुष्टां स्वमुक्तमनसैव शनैः क्षमन्ते।।११५।।

आसीत् तवात्र पुरुषोचितकामतृष्णा बह्वी, निगूढमनसः किल गह्वरेषु।
काचिद् बभूव मम दुर्बलताऽप्यलक्ष्या जन्या परिस्थितिवशान्मनसि प्रविष्टा।।११६।।

मुक्ताहमस्मि ननु सम्प्रति पूर्वरागाद् भोगैः प्रशान्तिमुपयान्ति न कामतृष्णाः।
तुष्टिं ययौ मम मनस्तव साहचर्ये प्रीतिं प्रसन्नमनसा समवाप्य कामम्।।११७।।

नालं भवन्ति जगतः पुरुषाय नार्यः कस्मै चिदत्र निखिला अपि कामतुष्ट्यै।
एकैव नीतिशतके कथिता सुभार्या, तस्मादनन्यहृदयां भज तां सुपत्नीम्।।११८।।

एकाकिनीव निवसामि सुबाल्यकालाद् वत्स्यामि चैव, नियतिस्तदियं ममाग्रे।
अस्मान्निवृत्य, गृहिणीं सुमुखीं भजस्व, तिष्ठन्ति केलिवनिता न गृहेष्वजस्रम।।११६।।

यातास्मि मित्र! नगरादपि शीघ्रमस्मात् स्वाङ्के निधाय तव संस्मृतिराशिमेव।
मैत्रीं तथैव मधुरामनुतापमुक्ताम् मन्येऽधुनापि विमलां तव शेवधिं मे।।१२०।।

श्रुत्वा सुसम्मतिमिमान्निजकेलिसख्या उन्मार्गतः सपदि नायक एष मुक्तः।
भ्रष्टः प्रभातसमये निजलक्ष्य मार्गात् सायन्तने प्रतिनिवृत्तजनो न वाच्यः।।१२१।।

क्वचिद् रागगर्भा, क्वचित् केलिवृत्तिः क्वचित् प्रेमनिष्ठा, क्वचित् संप्रसक्तिः।
निबद्धा कथायां यथापि श्रुता, सा विरक्तिर्निवृत्तिः पवित्रा प्रवृत्तिः।।१२२।।

***

**अनिलप्रतापगिरिः**
पाण्डिच्चेरी

# नागानन्दनाटके जीवनस्य पञ्चावस्थाः

संस्कृतसाहित्ये श्रीहर्ष–नाम्ना त्रयः साहित्यकाराः प्रसिद्धाः। प्रथमो भरतमुनेः नाट्यशास्त्रस्य वार्त्तिक–प्रणेता हर्षः, द्वितीयः कान्यकुब्जसम्राट् रूपककारो हर्षः तथा तृतीयो नैषधीयचरितमहाकाव्यस्य रचयिता श्रीहर्षः। सम्राट् रूपेण हर्षवर्धनः साहित्यक्षेत्रे हर्षनाम्ना प्रथितः।

**श्रीहर्षस्य जीवनवृत्तम्**

हर्षवर्धनो भारतीयेतिहासे खलु सम्राड्रूपे सुप्रसिद्धः। तस्य पिता प्रभाकरवर्धनः तथा माता यशोदेवी, ज्येष्ठभ्राता राज्यवर्धनः, भगिनी राजश्रीः इति सर्वविदितम्। हर्षस्य जन्म सरस्वतीनदीतटे कुरुक्षेत्रस्य निकटे थानेश्वरे ५९० खीष्टाब्देऽभवत्।

**हर्षस्य शासनम्**

हर्षस्य राज्यम् अत्यन्तसमृद्धिशाली तथा निरुपद्रवमासीत्। तस्य शासनकाले प्रसिद्धचीनीयात्रिहयं–एन्–सांग् भारतम् आगच्छत्। तस्य राज्यस्य विस्तरो हिमालयात् प्रारभ्य नर्मदा तथा मालव–गुजरात–सौराष्ट्र–बङ्गपर्यन्तमासीत्। तेन राज्ये शिक्षा प्रसारिता। प्रजाः सर्वथा सुखसमृद्धिपूर्णाः सन्तुष्टाश्च आसन्। तस्य सुशासने राज्यस्य विस्तृता आसीत्। हर्षवर्द्धनः पराक्रमी योग्यः शासकः, साहित्यप्रेमी विद्वान् तथा आश्रयदाता कविरासीत् तस्य सभायां बाण–मयूर–मातङ्ग–दिवाकरादयः श्रेष्ठकवय आसन्।

**श्रीहर्ष इत्यवनिवर्तिषु पार्थिवेषु, नाम्नैव केवलमजायत् वस्तुतस्तु।**
**श्रीहर्ष एव निजसंसदि येन सञ्ज्ञा, सम्पूजितः कनककोटिशतेन बाणः।।**

**हर्षवर्धनस्य कालनिर्णयः–**

श्रीहर्षः ६६ खीष्टाब्दपूर्वं विक्रमादित्यानुसारं ६०६ खीष्टाब्दपूर्वं राज्यसिंहासनमलञ्चकार। प्रभाकरवर्धनः ६०४ खीष्टाब्दे मृत्युं प्राप्तः। हर्षवर्धनः ४६ वर्षं यावद् राज्यशासनं करोति स्म। अनेन रूपेण सप्तमशताब्द्या

उत्तरार्द्धे तस्य स्थितिकालं निश्चेतुं शक्यते।

## हर्षस्य व्यक्तित्वं कर्तृत्वञ्च–

हर्षवर्धनस्य व्यक्तित्वं संस्कृतसाहित्यस्येतिहासे अतीव स्पष्टः पृष्ठपोषकश्चासीत्। हर्षवर्धनः केवलं वीरलक्ष्म्याः भक्त एव नासीदपितु सः स्वयं विविधशास्त्रेषु निपुणो विद्वानप्यासीत्। सः नाट्यकारः, गुणग्राही, ललितकलाभिज्ञः, प्रसिद्धकविः कवीनामाश्रयदाता च आसीत्।

## हर्षस्य प्रशंसा

महाकविः पीयूषवर्षजयदेवः स्वयं 'प्रसन्नराघव'–नाटके हर्षस्य कविताकामिनीं 'हर्षो' हर्षः इति उक्तवान्। सोडढलदेवः विंशशताब्द्याम् उदयनसुन्दरीकथानामकचम्पूग्रन्थे वर्णयति। मम्मटः काव्यप्रकाशे लिखति–

**श्रीहर्षादेः धावकादीनामिव धनम्।।**[1] अर्थात् काव्यस्य अध्ययनेन धनं प्राप्नोति। यथा श्रीहर्षस्य नाटकस्य रचयिता कविः धावको धनं प्राप्तवान्।

## श्रीहर्षस्य कृतिः

श्रीहर्षः रूपकत्रयस्य रचयिता, यथा प्रियदर्शिका–रत्नावली–नागानन्दश्चेति। नागानन्दनाटके पञ्च अङ्काः सान्ति। नाटकस्य कथावस्तु वेतालपञ्चविंशतिबृहत्कथामाधृत्य निबद्धम्।


नाटके पञ्चसन्धीनां–पञ्चार्थप्रकृतीनां संयोजनं भवति। येषां परिचयोऽत्र सङ्क्षेपेण दीयते–

| अर्थप्रकृतिः | | कार्यावस्था | | सन्धि | | सन्ध्यङ्गम् |
|---|---|---|---|---|---|---|
| बीजम् | + | आरम्भः | = | मुखम् | – | १२ |
| बिन्दुः | + | यत्नम् | = | प्रतिमुखम् | – | १३ |
| पताका | + | प्राप्त्याशा | = | गर्भः | – | १२ |
| प्रकरी | + | नियताप्तिः | = | विमर्शः | – | १३ |
| कार्यम् | + | फलागमः | = | निर्वहणम् | – | १४ |

१. काव्यप्रकाशे १ . २

नाट्यशब्दस्य व्युत्पत्तिः **'नटस्येदं कर्म नाट्यम्'** । वस्तुतो नाट्यशब्दस्य मुख्यार्थः रसो यथा भरतमुनिः स्वयं नाट्यशास्त्रे षष्ठेऽध्याये लिखति' **न हि रसादृते कश्चिदर्थः प्रवर्तते'**[१] तत्र व्याख्या क्रियते। आत्मसर्गीयभावना मुख्यरूपेण भूत्वा दयावीररस्य एवं करुणरसस्य प्रमुखता भवति। नाटके वैदर्भी रीतिः मुख्या भवति।

रस शब्दस्य व्युत्पत्तिः यथा–रस्यते अस्वाद्यते इति रसः। अर्थात् यस्य आस्वादनं क्रियते स रसः। अधोलिखिते चक्रे रस–परिचयः समासेन द्रष्टब्यः–




नाटके कविः शृङ्गाररसं गौणरूपे एवं दयावीरनायकस्य प्रधानतां वर्णयति।

---

१. नाट्यशास्त्रे ६ . १

**रसः**

शृङ्गारः

(कामदेवस्य उद्रेकः शृङ्गं भवति, तस्य आगमनं शृङ्गारः।)

↓

स्थायिभावो रतिः

↓

(स्वमनसः प्रियवस्तुविषये प्रेमपूर्णभावो रतिर्भवति।)

↓

यथा–स्त्री–पुरुषाणाम् आलम्बनम्

↓

संयोगः → चित्तवृत्तिनां संयोगः → यथा–नागानन्दः

विप्रलम्भः → चित्तवृत्तिनां संयोगः

नागानन्दनाटके जीमूतकेतुः स्वपुत्रस्य हस्ते समग्रं शासनभारं प्रदत्तवान्। तत्पश्चात् जीमूतवाहनस्य पितरौ प्रति भक्तिपूर्णं प्रेमवर्णनं दृश्यते यथा–सः संपूर्णं राज्यभारं मन्त्रिंहस्ते दत्वा स्वपितरौ सेवार्थं वनं गतवान्। अतोऽत्र पितरौ प्रति भक्तिपूर्णं प्रेम दृश्यते। यथा–

**पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम्।**
**वनं याम्यहमद्यैव यथा जीमूतवाहनः।।**[१]

यस्मिन् समये जीमूतवाहनो मलयवतीं द्रष्टवान्, तस्मिन् समये तस्य हृदये प्रेमभावोऽजायत्। अतः अत्र प्रियाया प्रेमभावो दृश्यते यथा–

**एतत्ते भ्रूलतोद्भासि पाटलाधरपल्लवम्।**
**मुखं नन्दनमुद्यानमतोऽन्यत् केवलं वनम्।।**[२]

तत्पश्चात् सः वन्धुसाकं तत्सौन्दर्यस्य दर्शनार्थं गतवान्। अतः अत्र वन्धुं प्रति प्रेम परिदृश्यते।

---

१. नागानन्दनाटके –पृ.–५।


२. तदेव ३.११

जीमूतवाहनः वनगमनसमये शङ्खचूड–नामक–नागपुत्रवियोगेन व्याकुलितौ पितरौ दृष्टवान्। तद्घटनां दृष्ट्वा तस्य हृदयं दुःखेन विगलितं भवति। अत एवं ततः शङ्खचूडनाम्नो नागस्य जीवनरक्षार्थं जीमूतवाहनः स्वकीयं जीवनम् अन्येषां कल्याणाय अर्पितं कृतवान्–

**आर्त्तकण्ठगतप्राणं परित्यक्तं स्वबन्धूभिः।**
**त्राये नैनं यदि ततः कः शरीरेण मे गुणः।।**[४]

मानवजीवनचक्रे कालचक्रस्य गतिश्चतुर्विधः प्रोक्तः कालचक्रमिदं क्रमशः सत्ययुग–त्रेतायायुग–द्वापरयुग–कलियुग रूपेण ज्ञातव्यम् तथैव मानवजीवनेऽपि अवस्था–पञ्चकं द्रष्टब्यम्[१] अवस्थापञ्चकेऽस्मिन् प्रेम्णो विविधरूपाणि दृष्टिपथमुपयान्ति यथा शैशवावस्थायां वासत्लयम् कैशोरावस्थायां बन्धुत्वं, यौवनावस्थायां प्रणयः, अर्धप्रौढास्थायां भक्तिपूर्णप्रेम तथा च वृद्धावस्थायां शाश्वतपूर्णप्रेम दृश्यते। सम्प्रति मनुष्यो निर्वाणकृते अग्रसरो भवति। शैशवावस्थायां वात्सल्यम्, किशैरावस्थायां बन्धुत्वम्, यौवनावस्थायां प्रणयम्, अर्धप्रौढावस्थायां भक्तिः, वृद्धावस्थायां वैराग्यम् इति पञ्चावस्थारूपेण विभक्तम्, सृष्टिचक्रे कालचक्रस्य गतिश्चतुर्विधः क्रमशः सत्ययुग–त्रेतायुग–द्वापरयुग–कलियुगरुपाः। अनेन प्रकारेण एकस्मिन्नेव युगे मानवजीवने कालचक्रस्य भिन्न–भिन्न–गतिरागच्छति। एतत् कालचक्रं पञ्चावस्थारूपेण हर्षवर्द्धनस्य काव्येऽधोलिखित रेखाचित्रेण दार्शनिकधियाऽपि द्रष्टुं शक्यते

जीवनचक्रम्




४. नाट्यशास्त्रे ४.११, पृ– १५५।

अनया दृष्ट्या नागानन्दनाटके जीमूतवाहनस्य प्रेम्णः उदात्त भावना परिलक्ष्यते। अत्र हर्षदेवो मलयवतीजीमूतवाहनयोः प्रणयगाथां सुष्ठु वर्णितवान्। अस्मिन् नाटके जीवात्मप्रेम। पशुपक्षीणां प्रेम, सहोदरप्रेम, मातृपितृप्रेम इत्यादिरूपेण विविधविधप्रेमसमुच्चयो वर्णितोऽस्ति। नाटके भावसौन्दर्यं भाषाविशदता–सरलता–सरसताप्रभृतयः गुणाः सन्ति।

अतो ज्ञायते हर्षवर्द्धनेन 'नागानन्दनाटके' मानवजीवनस्य पञ्चावस्थाः सुष्ठु निरूपिताः।

***

**इन्द्रेशकुमारझा**

दरभङ्गा

## मन्त्रार्थदीपिकामन्त्रार्थचन्द्रोदयोः तुलनात्मकं विवेचनम्

महामहोपाध्यायानां परमपूजनीयप्रातस्स्मरणीयानां मैथिलवंशावतंशानां शत्रुघ्नमिश्राणां स्व० नामधधानां श्रोत्रियवंशावतंशाना स्व० दामोदरशर्मणां कृतिमाधारीकृत्य उभयोः पाण्डित्यं त्रिकालदर्शित्वञ्च विविधमन्त्रव्याख्यानेषु विलोक्यैव मया मन्त्रार्थदीपिकामन्त्रार्थचन्द्रोदयग्रन्थौ विचारविषयीककृत्य अधुनातनजनानां विविधविधानां प्रश्नानां प्रत्युत्ताराण्युभयोः ग्रन्थयोरन्तः वर्त्तत इति निश्चितम्।

भवन्तो भारतालङ्कारभूता धर्मप्राणमानवा वेदैकप्रमाणपटवः शास्त्रविचक्षणा अवगन्तुं शक्नुवन्ति यत् कर्माकर्मविकर्मणाञ्च निश्चयाय मन्त्रंब्राह्मणादिग्रन्था एव शरणम्। अतएव मैथिलविचारमाश्रित्यैव सर्वेषामुत्तरं बुद्धिग्राहयं भविष्यतीति मदीया दृष्टिः।

देशस्य समस्तकृत्यानां प्रतिपादनमस्माकं पूर्वजाः विज्ञानबुद्ध्यैव प्रतिपादनपटवः स्वबुद्धिपाटवेन कृतवन्तः –

**यतो जातं जगत्सर्वे यच्च सर्वत्र तिष्ठति।**
**स्वयं चैतन्यरूपेण तस्मै श्री ब्रह्मणे नमः।।१।।**

**साहपुराभिधग्रामे रौपनाथिर्द्विजोत्तमः।**
**जलपादत्तशर्माऽभूत्कुजौलिकुलदीपकः ।।२।।**

**तस्य पुत्रोऽभवज्ज्येष्ठो विद्यानाथः प्रियंवदः।**
**कर्म्मणामग्रगण्यस्तु स वैदिकानां शिरोमणिः।।३।।**

**शैवः सौम्यतरो नित्यं वेदाध्ययनतत्परः।**
**कर्म्मकाण्डे तथाऽऽचारे जमदग्निरिवापरः।।४।।**

**महाराजाधिजस्य गिर्द्धौराधिपतेः प्रभोः।**
**आश्रयात्कृतकृत्यः सन् काश्यां मुक्तिपदं ययौ।।५।।**

तथहि–

**नत्वा गुरुपदद्वन्द्वं दृष्ट्वा ग्रन्थानशेषतः।**
**धर्म्मसंस्थापनार्थाय मन्त्रव्याख्या वितन्यते।।६।।**

**आस्तिका मुदमेष्यन्ति ग्लानिमेष्यन्ति नास्तिकाः।**
**दृष्ट्वैव रचनामेतामतो मन्त्रो विधीयते।।७।।**

**नरो मन्दमतिः क्वाहं क्व वेदो गूढ़तत्त्वकः।**
**यते तथाऽपि तस्यार्थे साम्राज्ये मन्दभागिव।।६।।**

तत्रादौ वेदविचारः प्रस्तूयते। वेदस्तावदस्माकमार्यहिन्दुजातीनां सनातनधर्म्मविषये स्वतः प्रमाण्यात्मकोऽपौरुषेयश्चास्ति। ब्राह्मणादिद्विजातयो हि मौञ्जीवन्धनानन्तरं यथाविधि वेदाध्ययनं कृत्वैव विहितयजनादिद्वारा कर्म्मफलानि लब्ध्वा सर्वोन्नतिपथ्यग्रगण्या भवन्ति। अतश्च वेदः स्वाध्यायशब्देन प्रतिपाद्यते। तस्मादुपनयनसमावर्तनानन्तरं द्विजातिभिर्ब्रह्मचर्यपालन–पुरस्सरमाचार्य्यसन्निधावेव स्थित्वा यथानियमं स्वाध्यायोऽध्येतव्यः। स्वाध्यायमन्तरा कथमपि जीवनोत्कर्षसाधनं न भवितुमर्हति। विशेषतश्च ब्राह्मणानां स्वाध्याय एव सर्वोन्नतिसाधनोपायस्तावद्दरीदृश्यते। तथा न च स्वाध्यायमन्तरेण अपहतपाप्मत्वं वागिन्द्रियभाक्त्वं च भवितुमर्हति, स्वर्गभात्तस्य तु कथैव का तदुक्तं श्रुत्या– ''अपहतपाप्मास्वाध्यायो व'' पवित्रं वा एतत्तद्योऽनुसृजत्यभागो वाचि भवत्यभागो नाके तदेषाऽभ्युक्ता'' **''यस्तित्याज सचिवं सखायं न तस्य वाच्यपि भागो अस्ति। यदि शृणोत्यलीकं श्रृणोति नहि प्रवेद सुकृत्यस्य पन्थाम्''** इति। ''तस्मादहरहः स्वाध्यायोऽध्येतव्यम्'' इति श्रुत्यन्तरेणापि स्वाध्यायाध्ययनमावश्यकत्वेन प्रतिपादितम्। स च स्वाध्यायो वेदो मन्त्रब्राह्मणात्मकत्वेनाभिधीयते, कात्यायनकृतप्रतिज्ञासूत्रे **''मन्त्रब्राह्मणयोर्वेदनामधेयम्''** इति तदुक्तेः। वेदः श्रुतिः स्वाध्यायो निगमश्चेति प्रत्येकमेकपर्य्याय एवास्ति। यद्यपि मन्त्रोऽर्थेऽभिधायकवाक्यतया ब्राह्मणश्चार्थे विधायकवाक्यतया प्रतीयते। तथापि केवलं हि अभिधायकवाक्यं मन्त्रः,

विधायकवाक्यं च ब्राह्मणमित्याख्याने सति तदुभयोः कर्म्माभिधाय–कत्वान्मन्त्रोऽपि ब्राह्मणतया ब्राह्मणञ्च मन्त्रतया प्रतिपादयितुं शक्यते। नहि मन्त्रब्राह्मणयोः केनापि प्रकारेण पारस्परिकः कश्चिद्भेदो दृश्यते। अतएव मन्त्रदृष्टारो याज्ञवल्क्यप्रभृतयो महर्षिगणा यस्य शब्दसमुदायस्य मन्त्ररूपेण विनियोगं दर्शितवन्तस्तस्यैव शब्दसमुदायस्य मन्त्रलक्षणं च कृतवन्तः **''द्रव्यदेवतादिस्मारको मन्त्रः''** इति। एवं यस्यैव शब्दसमुदायस्यायं विनियोगो येन वाक्येनानुमीयते तद्वाक्यस्य ब्राह्मणत्वमनुगम्यते। सुतरां मन्त्रभागो ब्राह्मणभागश्च वेद इति नात्र सन्देहः। मन्त्रस्तावद्यथानुष्ठितकार्य्ये यथावत्स्वरादिज्ञानपुरस्सरमृषिच्छन्दोदेवतार्थज्ञानपूर्वकं यथाविधि विनियुक्तः सन् स्वविवक्षितार्थं प्रकाश्य दृष्टादृष्टफलद्वयसाधको भवति। तदेवानुष्ठितं कर्म्म कदा कस्मिन्देशे कथं कर्त्तव्यमिति सन्देशे ब्राह्मणेनापि विधित्वेन तत्प्रतिपाद्यते। तदेव ब्राह्मणं द्विधा विभक्तं विधिभागोऽर्थवादभागश्चेति। विधिवाक्यसमूहस्य श्रेष्ठतां दृढ़ताञ्च प्रतिपादयितुमेवार्थवादवाक्यस्यापि प्रामाण्यं स्वीकर्त्तव्यम्। तदेवविधिवाक्यं यथा कर्म्मानुष्ठानाभिलाषिणो यजमानस्य कर्म्मप्रवृत्तिमुत्पादयति तथैवार्थवादवाक्यञ्चानुष्ठितकर्म्म–प्रशस्ततामवबोधयति। तस्मादेव पूर्वमीमांसाकारेण महर्षिजैमिनिनाऽपि ब्राह्मणभागस्वरूपवेदस्य विधिवाक्ये कर्म्मप्रेरणत्वेन अज्ञातज्ञापकत्वेन च निश्चित्य तदन्तर्गतमर्थवादवाक्यं विधिवाक्यतावाचकत्वेन स्थिरीकृतम्। तथैवाह भगवान्यास्कः **''मननान्मन्त्राः''** इति। तत्रैव मननहेतुत्वादेव मन्त्रः प्रतिपाद्यते। स्वरादीनां यथाविधि समुश्चारणेन शब्दसमूहस्य यथार्थतया ज्ञानं जायते, इत्यभिप्रायेणैव मननान्मन्त्रो व्याख्यातः। परञ्च नहि मन्त्रार्थज्ञानमन्तरा कर्म्मज्ञानं न च कर्म्मज्ञानं विना कर्म्मप्रवृत्तिर्जायते केषाञ्चिदपि। ततश्च कर्म्मप्रवृत्त्यभावे कर्म्मानुष्ठानमपि दुर्लभतरमेव। तथा सति तत्फलस्याप्यभावो निगद्यते। अतएव विधायकब्राह्मणवाक्यस्य विध्यनुसारेण कर्त्तव्यकर्म्मानुष्ठाने यथाविधि विनियुक्तः सन्नेव मन्त्रो यथार्थतया ऐहिकामुष्मिकाभ्युदयनिः–श्रेयसनिमित्तो भवतीति निश्चितम्। मन्त्रद्वारा यथा कार्य्यज्ञानं भवति तथैव ब्राह्मणद्वारा कार्य्यस्य विज्ञानं भवतीति नात्र कश्चित्सन्देहः।

तद्ज्ञानविज्ञानमूलकमन्त्रब्राह्मणात्मकशब्दराशेर्वेदस्य यथार्थतयाऽध्ययनाध्यापनाभावादेव ब्राह्मणो ब्राह्मण्यतेजोविहीनो, मन्त्रश्च विनियोगहीनः, कर्म्मसमुदायश्च फलहीनः, अतो लोकवृन्दकसुखहीनमित्येतत्सकलजनानुभसिद्धमेवास्ति। किञ्च पुरा खलु यथाविधिवेदाध्ययनादिनिरताऽस्माकं पूर्वजा ऋषिगणा ईदृगसाधारणधीशक्तिसम्पन्ना मेधाविनोऽतीतानागतपदार्थानां प्रत्यक्षदर्शिन आसन्। यद्भयादिन्द्रादयोऽपि सर्वदैव कृताञ्जलयो वर्त्तन्ते स्म। अन्येषान्तु पुनः का कथा। ते खलु निरतिशयमेधावैशिष्ट्यात्तमेव मन्त्रब्राह्मणात्मकशब्द राशिमखिलं वेदं जिह्वाग्र एव धारयन्तः सकलैहिकामुष्मिकभद्रमाप्नुवन्त एव ब्रह्मसायुज्यं गुरुशास्त्रपरम्परातः श्रूयते। तत्प्रभृत्येव श्रुततया स एव वेदः शिष्यपरम्परया समवधीतः सन्नेव श्रुतिरितिनाम्नाऽभिधीयते। किञ्च कालक्रमेण द्वापण्रयुगे वेदज्ञगुरुशिष्यसम्प्रदायेषु मेधाशक्तेर्ह्रासपरिदृष्टत्वात्परमकारुणिको भगवान् वादरायणोऽखिलसंसारस्य हितात्मतया तमेव मन्त्रब्राहमणात्मकं वेदं तत्तत्कण्ठेभ्य एव सङ्गृह्य ग्रन्थाकारं निर्माय तद्रक्षा चकार। तदैव सोऽयं वेदो दुरवगाहत्वादृग्यजुः सामाथर्वेतिनाम्ना चतुर्धा विभक्तस्तेनैव। तत्प्रभृत्येव तत्कारणाद्भगवान्वादरायणो वेदव्यास इतिनाम्ना सुप्रसिद्धोऽभूत्। नानादेशीयर्षिसन्निकटतः सङ्गृहीततया स एव वेदः प्रत्येकं शाखातश्च विभक्तः सन्नपि मन्त्रब्राह्मणात्मकत्वेन स्वाध्यायशब्देनैव निगद्यते तदुक्तं भगवता यास्केन **''साक्षात्कृतधर्म्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्म्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशायग्लायन्तोऽवरे विल्मग्रहणायेमं ग्रन्थं समाम्नासिपुर्वेदञ्च वेदाङ्गानि च''** इति उक्तरूपोऽयं मन्त्रभागो ब्राह्मणभागश्च अपौरुषेयवेदस्यात्मभूतो यथाविधि अध्ययनाध्यपनादिद्वारा यथाभीष्टफललाभाय निरतिशयेन जागर्त्ति। अर्थबोधनाय शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिः शास्त्राणि प्रवृत्तानि, एभिरङ्गैः सहयुक्तो वेदः शब्दतोऽध्येयोऽर्थतश्च ज्ञेयः सर्वैरेव द्विजातिभिः। तमेवापौरुषेयं षडङ्गं वेदं मूलप्रमाणस्वरूपमवलम्ब्य स्मृतिपुराणादिसहस्रशास्त्राणि दर्शनशास्त्राणि च प्रकाशीकृत्य तत्तच्छास्त्रकृतश्च महर्षिगणास्तमेव वेदं शास्त्रान्तरे प्रमाणयन्ति

स्म। न चान्यानि कानिचिच्छास्त्राणि वेदे प्रमाणभूतानि दरीदृश्यन्ते। स च सर्वतन्त्रस्वतन्त्रो वेदः सनातनार्य्यहिन्दुजातेरेकतन्मात्रतया महादुर्गस्वरूप एव दृश्यते। तस्मिन्प्राचीनवेदे महाप्राकारमध्यस्थेव सनातनार्य्यहिन्दुजातिः सुरक्षिताऽस्ति। एवं वेदप्रभावादेव सनातनधर्म्मोऽपि चातुर्वर्ण्यसमाजस्यास्तित्वे पापमयमहाकालकरालव्यालकलियुगप्रेरितस्वेच्छाचारप्रचाराऽवैदिकधर्म्म निराकरणे च प्रवृत्तोऽस्तीति सुधियो विभावयन्तु गीर्वाणवाणीविलासकला कुशलाः श्रीमन्तो भवन्तः।

तद्वेदस्याध्ययनाध्यापनाभावादेवाऽधुना सनातनार्य्यहिन्दुजाति–र्दिनानुदिनं शक्तिहीना क्षीणप्रभावा श्रीविहीना दृश्यते। वेदाध्ययन–मावश्यकत्वेन मन्वादिभिरप्युक्तं तद्यथा–

**''वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।**
**अविलुप्तब्रह्मचर्य्यो गृहस्थाश्रममावसेत्।।''[1] इति।**

***

१. मनुस्मृतौ ३.२

**डॉ श्रीमती ज्योतिकुमारी**
छपरा

# उपनिषत्सु अद्वैतवादस्य विवेचनम्

उपनिषत्सु अद्वैतवादस्य स्थापनं भवति। तत्र परमात्मतत्त्वं प्रमुखतया वर्णितम् अयमात्मा परमपुरुषः विष्णोः परमं पदं च एव। अयं ब्रह्म एव कथ्यते। अयम् ओंकाररूप ईश्वरोऽस्ति। साधूक्तं कठोपनिषदि–

**सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद् वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहणेन ब्रवीम्योमित्येतत्।।**[१]

ओमित्योंशब्दवाच्यमोंशब्दप्रतीकं च पदं सर्वे वेदाः आमनन्ति, सर्वाणि तपांसि च यद् वदन्ति; यद् इच्छन्तः ब्रह्मचर्यं चरन्ति, तत्पदं ते सङ्ग्रहेण ब्रवीमि।

ओंकार–ईश्वरस्य स्वरूपं प्रतीकञ्च। ऋषिणा याज्ञवल्क्येन कथ्यते–

**वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः ।।**[२]

ॐ एतद् एव अक्षरं हि ब्रह्म। एतद् अक्षरमेव हि परमं, एतदक्षरमेव ज्ञात्वा यो यद् इच्छति तस्य तद् भवति। सन्दर्भेऽस्मिन् अयं मन्त्र उल्लेखनीयः–

**एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परम्।**
**एतदेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।।**[३]
**एतत् श्रेष्ठमालम्बनमस्ति एतत् परमालम्बनम्।**
**एतद् आलम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।**
**एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते।।**[४]

---

१. कठोपनिषदि १.२.१५
२. कल्याणे (उपनिषद्–अङ्के) वर्षम् २३, पृष्ठसंख्या–८६
३. कठोपनिषदि १.२.१६
४. तदेव १.२.१७

इदं ब्रह्म सर्वव्यापी सर्वातिशायि च। यथा एकोग्निः भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव तथा एकः सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च। अनेन वायोः दृष्टान्तेनापि सिद्ध्यति। समस्तप्राणीनामन्तर्यामी परमेश्वर एकोऽस्ति। अमीश्वरो जगतः कारणमस्ति। अनेन अखिल–विश्वं प्रकाशते। अयं ज्योतिस्वरूपः तेजोपुञ्जः अस्ति। कठोपनिषदि–

**तदेव शुक्रं तदेवामृतमुच्यते।**
**तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ।।**[१]

इदं ब्रह्म सर्वभूतान्तरात्मा अस्ति। अयं आत्मा नित्यानां नित्योऽस्ति। चेतनानामेकः चेतनः अस्ति। अस्य जन्तोः गुहायां निहितः आत्मा अणोः अणीयान् महतो महीयान् अक्रतुः आत्मनः तं महिमानं पश्यति। ततो वीतशोको भवति यथोक्तं कठोपनिषदि –

**अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहतो गुहायाम्।**
**तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः।।**[२]

अद्वैतवादिनः उपनिषदि अद्वैतवादस्य वर्णनं सविस्तरेण कुर्वन्ति। परं तु केचन् अद्वैतवादस्य विरोधिनः आचार्याः सन्ति ये उपनिषदि वर्णिताद्वैतवादस्य खण्डनं कुर्वन्ति । तैः कठोपनिषदोऽयं मन्त्रः प्रस्तूयते –

**ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे।**
**छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः।।**[३]

अत्र जीवात्मा परमात्मा च छायापतौ इव वर्तेते। अद्वैतवादस्य खण्डनार्थं अन्यप्रमाणमिदमस्ति–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यं पिप्पलं स्याद्वत्यनश्नन्नन्यो अभिचाकशीति।।**[४]

---

१. कठोपनिषदि १.३.१

२. तदेव १.२.२०

३. तदेव १.३.१

४. मुण्डकोपनिषदि ३.१.१

अनने मन्त्रेण जीवत्मनि परमात्मनि च विभेदो लक्ष्यते। इदं शरीरं वृक्षमस्ति। जीवत्मा परमात्मा च पक्षिणौ स्तः।

द्वैतवादस्य समर्थनेऽयं मंत्रोऽस्ति। अत्र जीवात्मनि परमात्मनि च विभेदो विव्रियते। परं तु सन्दर्भवशादिति न सिध्यति यज् जीवत्मा परमात्मा उभौ च भिन्नं भिनं स्तः। तत्र औपाधि–भेदः अस्ति मायावशात् परमेश्वरः अनेकानि रूपाणि दधाति। उपनिषदि स्पष्टोल्लेखो भवति **इन्द्रो मायाभिः पुरुरूप ईयते।**[1]

कठोपनिषदि नचिकेतसः तृतीयवरे जीवात्मनि च विभेदः इति परीक्ष्यते–

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येको नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः।।**[2]

यमेन अस्य प्रश्नस्य समाधानार्थ प्रथमतो जीवात्मनो लक्षणं दीयते। तदर्थं परमात्मविषयकरहस्यमुद्धृयते। अनेन द्वैतवादस्य खण्डनं क्रियते। अयं मन्त्रो द्रष्टव्यः –

**मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन।**
**मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति।।**[3]

अर्थाद् इदं मनसा एव आप्तव्यम् इह नाना किञ्चन् नास्ति, य इह नाना इव पश्यति सः मृत्योः मृत्युं गच्छति।

वस्तुतो जनैः जीवात्मनि परमात्मनि च विभेदः अविद्यावशादवगम्यते। विद्याया अभावान् मानवाः आत्मानं नाना इव पश्यन्ति ते मृत्योः मृत्यं प्राप्नुवन्ति। यथोल्लेखनीयः–

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।**
**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः।।**[4]

---

१. कल्याणे (उपनिषद् अङ्के), वर्षम्–२३ पृष्ठ संख्या – ८६

२. कठोपनिषदि १.२.२०

३. तदेव २.१.११

४. तदेव १.२.५

आत्मतत्त्वज्ञानार्थं निर्मलबुद्धेः आवश्यकताऽस्ति। अस्य ज्ञानं नितान्तं दुष्करमस्ति। साधूक्तं कठोपनिषदि–

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**

**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति।।**[1]

आत्मतत्त्वानां ज्ञानं क्षुरस्य निशिता दुरत्यया धारा इव वर्तते। द्वैतवादिनः उपनिषदि वर्णिताद्वैतवादस्य खण्डनं कुर्वन्ति। द्वैतवादसम्मितमन्त्रैः अद्वैतवाद एव स्थाप्यते। उपनिषदि विव्रियते यज् जीवात्मा परमात्मनो रूपमस्ति उभयोः कोऽपि विभेदो नास्ति। इदं जगत् मिथ्या। एकं ब्रह्मैव परमार्थसत्यमस्ति। जीवात्मानं बिना परमात्मानं ज्ञातुं न शक्यते। अतएव उपनिषदि जीवत्मा परमात्मा च सविस्तरेण विव्रियेते। अतः सिध्यति ब्रह्म सत्यं जगन्मिथ्या जीवो बह्मैव नापरः।

***

१. कठोपनिषदि १.३.१४

**डॉ० शेषमणिशुक्लः**

लखनऊ

# संस्कृताऽध्ययन–प्रयोजनम्

संस्कृताध्ययनप्रयोजनविषये सर्वप्रथममिदं वक्तव्यमस्ति यत् सर्वेषां जनानां समानानि प्रयोजनानि न सन्ति। फलतः संस्कृताऽध्ययनेन यानि प्रयोजनानि सिद्ध्यन्ति, तानि सर्वेषां जनानामभीष्टानि स्युः, इदमावश्यकं नास्ति। इदमेव कारणं यद् इदानीं जनाः प्रायः संस्कृताध्ययने रुचिं न दधते, यतोहि संस्कृताध्ययनेन यानि प्रयोजनानि सिद्ध्यन्ति तानि इदानीं तेषां जीवनस्य प्रयोजनानि एव न सन्ति।

अद्यापि बहवो जनाः कीदृशीमपि शिक्षां न ग्रहणन्ति अपितु यावज्जीवनम् अशिक्षिताः एव सन्तः तिष्ठन्ति, अथ च "काकोऽपि जीवति चिराय बलिं च भुङ्क्ते" इति वाक्यप्रतिपाद्यं चरितार्थं कुर्वन्ति। किन्तु ये जनाः शिक्षायामभिरुचिं दधते, तेषां कृते इदं विचारयितुं शक्यते यदन्यासां भाषाणामध्ययनेन यथा विभिन्नानि प्रयोजननां सिद्ध्यन्ति तथा संस्कृताध्ययनेनाऽपि किञ्चित् प्रयोजनं सिद्ध्यति। यदि तत् प्रयोजनं तेषामभीष्टं स्यात् चेद् तैः संस्कृताध्ययनम् अवश्यमेव कर्तव्यम्। संस्कृताध्ययनस्य प्रयोजनानि अग्रलिखितानि –

**भाषाऽध्ययनप्रयोजनानि**– कस्या भाषायाः अध्ययनस्य मुख्यतो द्विविधं प्रयोजनं भवति। एकं तु स्वयं भाषाध्ययनसाध्यम् अपरञ्च तन्निबद्ध वाङ्मयाध्ययनसाध्यम्। भाषाऽध्ययनसाध्यं प्रयोजनमपि पुनः द्विविधं भवति। एकन्तु व्यावहारिकम्, अपरञ्च शास्त्रीयम्, सैद्धान्तिकं वा। भाषाध्ययनसाध्यं व्यावहारिकं प्रयोजनं तद् भाषाभाषिभिः सह तस्या भाषायां वार्तालापद्वारा परस्परं विचाराणाम् आदान–प्रदानम्, अथ च तैः सह विभिन्नव्यावहारिककार्यसम्पादनम् अस्ति। भाषाऽध्ययनसाध्यं शास्त्रीयं प्रयोजनं तस्याः भाषायाः अन्याभिः भाषाभिः सह भाषावैज्ञानिकरीत्या तुलनात्मकेनाध्ययनेनोदं ज्ञानं भवति यत् तस्याः भाषायाः अन्याभिर्भाषाभिः सह

कः सम्बन्धोऽस्ति। तया अन्याभ्यो भाषाभ्यः कस्मिन् रुपे किं दत्तम्, अन्याभ्यश्च तया किं ग्रहीतम्? अथ च तद्भाषाभाषिणां जनानाम् अन्य भाषाभाषिभिर्जनैः सह कः कीदृशो वा विभिन्नो धार्मिकः, सामाजिकः, सांस्कृतिकः, राजनैतिकः, आर्थिकः, ऐतिहासिको भौगोलिको वा सम्बन्ध आसीदस्ति वा, येन तदनुकूलं परस्परमैक्यभावना सम्पद्यते। तद्वाङ्मयप्रतिपादितविभिन्नविषयाणां ज्ञानं तद्द्वारा च विभिन्नानां धर्मार्थकाममोक्षादीनां पुरुषार्थानां साधनमस्ति।।

<u>**राष्ट्रियप्रयोजनम्**</u>– अनेनैव प्रकारेण संस्कृतभाषानिबद्धवाङ्मयाध्ययन–साध्यं राष्ट्रियं प्रयोजनं विपुलमस्ति। सर्वप्रथमञ्चैतादृशं प्रयोजनं संस्कृतनिबद्धस्य विपुलस्य वाङ्मयस्य संरक्षणमस्ति। कस्यापि वाङ्मयस्य संरक्षणम् अध्ययनाध्यापनाभ्यामेव भवति। अध्ययनाध्यापनद्वयेन विना वाङ्मयं लुप्तं भवति, यथा संस्कृतस्य प्रचुरं वाङ्मयं लुप्तं जातम्। इदानीं तु यदि अध्ययनाध्यापनाभावाद् अवशिष्टं प्राचीनं संस्कृतवाङ्मयं लुप्तं स्यात् तदा राष्ट्रगौरवं पूर्णतो नष्टं भविष्यति।

इदानीं तु भारतीयैर्जनैरिदं घोषयितुं शक्यते यत् तेषां वेदवाङ्मयम् विश्वस्योपलब्धं प्राचीनतमं वाङ्मयम् अस्ति। यदाधारेण तु इदं कथयितुं शक्यते यत् तेषां संस्कृतिः सभ्यता च अतीव प्राचीना वर्तेते, पूर्वकाले ते असंस्कृताः असभ्याः वा न आसन्, अपितु यदा विश्वस्य बहूनां राष्ट्राणां जन्म न जातं तदा भारतं विज्ञानज्ञानयुक्तं भूत्वा विराजते स्म। अनेन सहैव तस्य पार्श्वे अन्यदपि विविधविषयकं ज्ञानविज्ञानपूर्णम् एतादृशं प्राचीनं वाङ्मयं वर्तते यदस्य तथ्यस्य साक्षि वर्तते यद् भारतेन ज्ञानविज्ञानक्षेत्रे बहुआविष्कृतम्, बहु च अन्येभ्यो राष्ट्रेभ्यो दत्तम्। इत्थं संस्कृतवाङ्मयसंरक्षणेन राष्ट्रगौरवं राष्ट्रैश्वर्यं च संरक्षितं भवति। अन्यथा विश्वस्य जनाः कथयिष्यन्ति यद् यथा आधुनिककाले भारतेन पाश्चात्यदेशेभ्यो बहुग्रहीतं ग्रह्यते च, तथैव सदैव प्राचीनकालादारभ्य ग्रहयते स्म। इत्थं किं राष्ट्रगौरवम् अवशिष्टं स्थास्यति। एतद्विपरीतं, यदि निष्ठया भारतीयैः जनैः संस्कृताध्ययनं क्रियते तत्रावश्यकतानुसारेण समयानुसारेण च प्रयत्नपूर्वकं परिष्करणं संवर्द्धनं वा कृतं स्यात् चेत् तदा यथा तैः पूर्वकाले विश्वाय बहुदत्तं तथेदानीम् अपि दातुं शक्यते। इदं कृत्वा तैः प्राचीनकालात्समुपार्जिते राष्ट्रगौरवे काचन् उल्लेखनीया वृद्धिरेव कर्त्तुं शक्यते।।

**सार्वजनीनं प्रयोजनम्**– संस्कृतवाङ्मयाध्ययनस्य द्वितीयं प्रयोजनं तत्प्रतिपादितानां विभिन्नविषयाणां ज्ञानं वर्तते। अस्मिन् प्रयोजने तु सार्वजनीनम् इदमवान्तरं प्रयोजनं समाविष्टं वर्तते यत् ते ज्ञास्यन्ति यत् तेषां पूर्वजैः ज्ञानविज्ञानक्षेत्रे विभिन्नानि अनुसन्धानानि विधाय को निधिः तेषां कृते समर्पितः, कथं चाधुना तदाधारेण तस्मिन् एव संवर्धनं कृतं स्यात्।।

**वैयक्तिकं प्रयोजनम्**–संस्कृतवाङ्मये निबद्धविषयेषु यस्मिन् विषये यस्य अभिरुचिः स्यात् तस्य ज्ञानं तेन तस्मात् प्राप्तव्यम्। सुदूराद् अतीतकालात् प्रवर्तमाने अद्यावधि च प्रतीयमाने संस्कृवाङ्मये स्वभावत एव प्रतिपाद्य–विषयाणां बाहुल्यं वर्तते। धर्मशास्त्रम्, अर्थशास्त्रम् काव्यशास्त्रम्, दर्शनशास्त्रम्, राजनीतिशास्त्रम्, ज्योतिषशास्त्रम् आयुर्वेदशास्त्रम् अन्यानि च यानि विविधानि वैज्ञानिकानि शास्त्राणि सन्ति, तैः विभिन्नैः शास्त्रैः सम्बद्धाः विविधाः विषयाः, यथा भाषाशास्त्रं, व्युत्पत्तिशास्त्रं, काव्यशास्त्रं, नाट्यशास्त्रं, तर्कशास्त्रादि सम्बद्धाश्च विभिन्नाः विषयाः इतिहासपुराणकाव्यनाटक–व्याख्यायिकादिरुपाश्च विभिन्नाः साहित्यिकग्रन्थाः संस्कृतवाङ्मये विद्यन्ते। यथारुचि यथापेक्षं च तेषाम् अध्ययनं जनैः कर्तुं शक्यते। स्वाभीष्टानुसारेण च विविधानि धर्मार्थकाममोक्षादिरूपाणि प्रयोजनानि तैः साधयितुं शक्यन्ते।।

इत्थं भाषावैज्ञानिकरीत्या संस्कृतभाषायाः अन्याभिः विभिन्नाभिः भाषाभिः सह तुलनात्मकेनाऽध्ययनेन पूर्वोक्तं विविधं महदुद्देश्यं ज्ञानं प्राप्तुं, संस्कृतवाङ्मयसंरक्षणेन राष्ट्रगौरवं राष्ट्रे च संरक्षितुं, भारतस्य प्राचीनं पूर्वोक्तं धार्मिकादिकम् इतिहासं ज्ञातुं, तुलनात्मकं धर्मविज्ञानं च परिज्ञातुं, संस्कृतवाङ्मये प्रतिपादितानां विभिन्नानां वैज्ञानिकविषयाणाम् अन्येषां विषयाणां ज्ञानेन विविधान् लाभान् सम्पादयितुम्, अनेन सहैव प्राचीनां भारतीयानां वैज्ञानिकीं तदितराञ्च च बहुमुखीं प्रतिभां द्रष्टुम् अस्मिन् वैज्ञानिक–युगेऽपि संस्कृताध्ययनं परमावश्यकं वर्तते, सामान्यतश्च तन् महाप्रयोजनं वर्तते एव फलतश्च इदानीमिदं कथयितुमपेक्षा नावशिष्यते यदुक्तानि विभिन्ननि उद्देश्यानि सम्पादयितुमभिनवभारते संस्कृतज्ञानं परमावश्यकं वर्तते।।

***

**डॉ० अंशुमान्शुक्लः**
हरदोई

# मूर्धनि कालविधानशास्त्रम्

विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनमित्यनुबन्धचतुष्टयेषु प्रयोजनस्यान्यतमत्वादत्रापि विचारणीयमेव 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति प्रयोजनस्य पुरः स्थापनं संसारे सर्वत्र दृष्टिगोचरम्। यथा वेदाङ्गेषु परिगणितानां शिक्षादिशास्त्राणां प्रयोजनं विहितं तथैव तेषु वेदाङ्गेषु परिगणितस्य ज्यौतिषशास्त्रस्यापि प्रयोजनं सुतरां विचारणीयम्।

ज्यौतिषं कालज्ञापकं शास्त्रम्। वेदाङ्गानां मध्ये अन्यतमस्य कालविधानशास्त्रस्य ज्योतिषशास्त्रस्य महत्त्वविषये कोऽपि विसंवादो नास्ति यागादिक्रियाकलनाय मुहूर्तज्ञानमावश्यकं यथोक्तं वेदाङ्ग–ज्योतिषे–

**"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालाभिपूर्वा विहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञम्।।**[१]

तत्र दिवसमुहूर्ता यथा –

**रौद्रा हि – मित्र – पितरो वसुवारिधिपश्च**
**विश्व – प्रजापति – शशाङ्क कृशानुरिन्द्रः।**

**नक्तञ्चराश्च वरुणार्यमयोनयश्च,**
**प्रोक्ता दिने दश च पञ्च तथा मुहूर्ताः।।**

रात्रिमुहूर्ताः

**निशामुहूर्ता गिरिजाऽजपादा अहिर्बुध्नपूषाश्वि – यमाग्नयश्च ।**
**विधातृ–चन्द्रादितिजीव–विष्णुतिग्मद्युतित्वष्ट्'–समीरणाश्च ।।**

प्रतिसंस्कारं प्रतिमुहूर्तचर्चा शास्त्रसम्मता युक्ता। तत्

१. वेदाङ्गज्योतिषे–३

फलभोक्तृभिश्शुभाशुभफलं स्वयमेव प्रोच्यते। मुहूर्तसाधने फलं शुभम्भवति। अन्यथा तु अशुभं भवति। यतो हि –

**भार्यात्रिवर्गकरणं शुभशीलयुक्ता, शीलं शुभं भवति लग्नवशेन तस्याः।**
**तस्माद् विवाहसमयः परिचिन्त्यते हि, तन्निध्नतामुपगताः सुतशीलधर्माः ।।**[१]

प्रतिवेदं पृथगेव ज्यौतिषशास्त्रम्। अष्टादश–महर्षयोऽस्य प्रवर्तकाः सन्ति। अस्य शास्त्रस्य त्रीणिं वर्त्मनि तस्मात् शास्त्रमिदं त्रिस्कन्धमुच्यते– फलितं ज्यौतिषं, गणितं ज्यौतिषं च द्विविधम्। फलादेशे सामुद्रिक–शास्त्रस्यातीव महत्त्वम्। पृथ्वी–चन्द्र–नक्षत्रादीनां गतिविधौ गणितस्याऽतीव महत्त्वं वर्तते। अङ्कगणितं, बीजगणितञ्चेति शास्त्रद्वयमपि ज्यौतिष–विज्ञानस्याङ्गभूतम्। ज्यौतिषशास्त्रं नमनीयम् –

**योजनानां सहस्रे द्वे द्वे शते द्वे च योजने।**
**एकेन निमिषार्धेन क्रममाणाय ते नमः।।**

शाब्दिकशिरोमणिः महर्षिः पाणिनिः कथयति पाणिनीयशिक्षायाम्–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्यौतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[२]

तत्र वेदाङ्गत्वेन ज्यौतिषशास्त्रमुद्घोषितम्। एवञ्च वेदाङ्गे ज्योतिष ग्रन्थे –

**पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।**
**दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ।।**[३]

अत्र वेदाङ्गे ज्यौतिश्शास्त्रे पञ्चसंवत्सरमयम् इति शब्देन –

---

१. मुहूर्तचिन्तामणौ, विवाहप्रकरणे–१

२. पाणिनीयशिक्षायाम् ४१–४२

३. वेदाङ्गज्योतिषे–१

१. संवत्सरः ,२. परिवत्सरः , ३. इदावत्सरः , ४. अनुवत्सरः , ५. इद्वत्सरः , इति पञ्चसंवत्सरभेदाः प्रतिपादिताः।

तदेतत्सामान्याकारेणा संवत्सरादिपञ्चविधत्वं सावित्रीचयनगताग्नि प्रशंसकमन्त्रे पठ्यते।

वेदाङ्गज्योतिषनाम प्रसिद्धं प्राचीनग्रन्थरत्नमस्ति भागद्वये विभक्तम्–आर्चज्योतिषं (ऋग्वेदस्य) याजुषज्योतिषं (यजुर्वेदस्य) उक्तञ्च आर्चज्योतिषे –

**'कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।'**[1]

वेदाङ्गज्योतिषविषये खल्वेतादृश्येव स्थितिः प्राचीने काल एवोपस्थिताऽनुमीयते। भारतवर्षस्य चातुर्वर्ण्यस्य धर्ममोक्षविषयकज्ञानस्य मुख्यं स्रोतो वेद–वेदाङ्ग–ब्राह्मण–गृह्यसूत्र–धर्मसूत्र–कल्प–व्याकरण–निरुक्तच्छन्दो–ज्योतिरूपं ज्यौतिषशास्त्रम्, तदुपोद्वलकानि अन्यानि परिशिष्टानिस्मृति–पुराणापयपुरारादीनि चेति विदो विदन्त्येव।

तत्रानादेरपौरुषेयस्य वेदस्य गुरुशिष्यपरम्परया अविच्छेदेन धारणेन वेदादिशास्त्रस्ययथार्थस्वरुपरक्षायै तदर्थाधिगमेन धर्ममोक्षसाधनाय चैव द्विजातीनामुपनयनं क्रियते। अतएवोपनयनपूर्वकमुपाकर्मपुर्वकञ्च विधिनाऽधीतानां हि शास्त्राणां धर्मे मोक्षे च मुख्यं प्रामाण्यम्। अन्येषां तु–तथाधीतशास्त्रविहितोक्तसूचितानुवादेन तदाकाङ्क्षितपूरणेन तदनुकूलार्थ–समर्पणे तदविरोध्यर्थप्रतिपादनेन चैव वेदादीनामुपबृंहणेनैव प्रामाण्यं धर्ममीमांसाशास्त्रेण शिष्टैश्च स्वीक्रियमाणमवगम्यते । एष एव हि वैदिकानां मुख्यः शास्त्रप्रामाण्यसिद्धान्तः–

**मनुते मनुरपि कालतेव सृष्टिम्।**

यथा–

**कालं कालविभक्तिं च नक्षत्राणि ग्रहांस्तथा।**
**सृष्टिं ससर्ज चैवेमां सष्टुमिच्छन्निमाः प्रजाः।।**

---

१. आर्चज्योतिषे – २

अस्तु वैदिक–ज्यौतिषे –

**पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।**
**दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः।।**[१]

तत्र धर्मशास्त्रानुसारेण संवत्सरो नामायनाद्यवयवयुतोऽवयवी कालविशेष एव। सम्यग् वसन्त्यस्मिन् अयनर्तुमासादयः इति। तत्र ब्रह्मसिद्धान्तेऽपि–

**चान्द्र – सावन सौराणां मासानां च प्रभेदतः।**
**चान्द्र– सावन – सौराः स्युस्त्रयः संवत्सरा अमी।।**

तत्र चान्द्रः संवत्सरः चैत्रशुक्लाप्रतिपदादिः फाल्गुनदर्शान्तः। सौरस्तु मेषादिर्मीनान्तः। सावनः षष्ठ्युत्तर–शतत्रयहोरात्मकः ते च त्रयः संवत्सरा केषुचित् कर्तव्येषु व्यवतिष्ठन्ते केषुचिच्च विकल्पन्ते। तत्सर्वं धर्मशास्त्रतो ज्ञेयम्, कालनिर्णयमिषेणैव दैवज्ञाः आहुरेतदेव यथोक्तं महाभारते विराटपर्वणि–

**''कलाः काष्ठाश्च युज्यन्ते मुहूर्त्ताश्च दिनानि च।**
**अर्धमासाश्च मासाश्च नक्षत्राणि ग्रहास्तथा।।**

**ऋतवश्चापि युज्यन्ते तथा संवत्सरा अपि।**
**एवं कालविभागेन कालचक्रं प्रवर्तते।।**

**तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात्।**
**पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः।।**[२]

इति वेदाङ्गज्योतिषोक्ता कालगणनाव्यवस्था अधिमासव्यवस्थाश्च विशेषेणेल्लिखितेति विज्ञायते।

महाभारते सभापर्वाणी च पञ्चवर्षात्मकयुगस्योल्लेखो अस्माभिर्दृष्टः। तथाहि–

---

१. वेदाङ्गज्योतिषे – १

२. महाभारते ४.५२.१.

**"संवत्सराः पञ्च युगमहोरात्रश्चतुर्विधः।**
**कालचक्रं च तद् दिव्यं नित्यमक्षयमव्ययम्।।"**[1]

शान्तिपर्वणि मुहूर्तपरिभाषायां चास्माभिर्वेदाङ्गज्योतिषोक्तसंवादो दृष्टः। तथा हि–

**"विंशत् कलश्चापि भवेन् मुहूर्तो भागः कलाया दशमश्च यः स्यात्।**
**त्रिंशन्मुहूर्तश्च भवेदहश्च रात्रिश्च सङ्ख्या मुनिभिः प्रणीताः।।"**[2]

आश्वमेधिके पर्वणि –

**"अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयः स्मृताः।**
**श्रवणादीनि ऋक्षाणि ऋतवः शिशिरादयः।।"**[3]

कौटिलीयेऽर्थशास्त्रे च– **"कालमानमत ऊर्ध्वम्। त्रुटो लवो निमेषः काष्ठा कला नाड़िका मुहूर्तः पूर्वापरभागौ दिवसो रात्रिः पक्षो मास ऋतुरयनं संवत्सरो युगमिति कालाः।**[4]

सुश्रुतसंहितायां च– "विंशतिकलो मुहूर्तः कलादशभागश्च" तत्र माघादयो द्वाद्वशमासाः संवत्सरः। द्विमासिकमृतुं कृत्वा षड्ृतवो भवन्ति।[5]

अष्टाङ्गहृदयेऽपि –

**"मासैर्द्विसङ्ख्यैर्माघाद्यैः क्रमात् षड्ृतवः स्मृताः।**
**शिशिरोऽथ वसन्तश्च ग्रीष्मो वर्षा शरद्धिमाः।।**

**शिशिराद्यौस्त्रिभिस्तैस्तु विद्यादयनमुत्तरम्।**
**आदानं च तदाऽऽदत्ते नृणां प्रतिदिनं बलम्।।**[6]

---

१. महाभारते २.११.३८
२. तदेव १२.२३१.१३
३. तदेव १४.४४.२
४. कौटलीयेऽर्थशास्त्रे ११५.१७
५. सश्रुतसंहितायाम् ६.६.५,६,७,६
६. अष्टाङ्गहृदये १.२.१–२

इति माघादयो मासा वेदाङ्गज्योतिषगणनानुकूलतयोल्लिखिता दृश्यन्ते।

बृहत्संहितायां पञ्चसिद्धान्तिकां रचितवता वराहमिहिरेण प्रोक्तम्–

**''आश्लेषार्धाद् दक्षिणामुत्तरमयनं रवेर्धनिष्ठाद्यम्।**
**नूनं कदाचिदासीद् येनोक्तं पूर्वशास्त्रेषु।।**[१]

कालवाची संवत्सरशब्दः अयनशब्देन, अयनशब्दः ॠतुशब्देन, ॠतुशब्दः मासशब्देन, मासशब्दः पक्षशब्देन, पक्षशब्दः तिथिशब्देन अन्योऽन्यभावसम्बन्धयुतो हि ज्यौतिषशास्त्रे दृश्यते। तिथिशब्दस्तु तनोतेर्धातोर्निष्पन्नः। तनोति विस्तारयति वर्धमानां क्षीयमाणां वा चन्द्रकलामेकां एकां क्रमशो यः कालविशेषः सा तिथिः।

अतो ज्यौतिषशास्त्रं वेदस्य षष्ठाङ्गमिति। अनुबन्धचतुष्टयमुक्तं नारदेन यथा–

**अस्य शास्त्रसम्बन्धो वेदाङ्ग इति चोदितः।**
**अभिधेयं च जगतां शुभाशुभनिरीक्षणम्।।**

**इज्याध्ययनसङ्क्रान्तिः ग्रहषोडशकर्मणाम्।**
**प्रयोजनं च विज्ञेयं तत्तत्कालविनिर्णयः।।**

अतोऽस्य प्रामाण्यं वेदमूलकत्वात् सिद्धम्।

उक्तञ्च वेदाङ्गज्यौतिषे–

**''यथा शिखा मयूराणां नागनां मणयो यथा।**
**तद्वद् वेदाङ्गशास्त्राणां ज्यौतिषं मूर्ध्नि संस्थितम्।।''**[२]

***

---

१. बृहत्संहितायाम् आदित्याचाराध्याये–१

२. वेदाङ्गज्योतिषे–४

प्रो० अशोककुमारकालिया
लखनऊ

# कविता—मकरन्दम्

## विश्वविद्यालय—गीतम्

अथ विश्वविद्यामन्दिरं लक्ष्मणपुरीयं राजताम्।
राराज्यतां दिशि दिशि चिरम् इदमेधतामभिवर्द्धताम्।।

विद्यातपश्चर्याधनं विद्याधिदैवतकुलधनम्।
विद्याप्रसादनसाधनम् इदमेधतामभिवर्द्धताम्।।

विज्ञानवरिवस्याफलं जिज्ञासुकल्पद्रुमदलम्।
प्रतिभाजुषां तीर्थस्थलम् इदमेधतामभिवर्द्धताम्।।

प्रज्ञानिनां प्रज्ञार्थिनां प्राध्यापकाऽन्तेवासिनाम्।
वरकुलपतेश्चाश्रमपदम् इदमेधतामभिवर्द्धताम्।।

फलमभ्युदयनिःश्रेयसं वितरद् वदान्यतयेप्सितम्।
योगं तथा क्षेमं दिशद् इद्मेधतामभिवर्द्धताम्।

भारतधरातिलकाञ्चनम् अवधाख्यमण्डलमण्डनम्।
लक्ष्मणपुरीहृद्हारकम् इदमेधतामभिवर्द्धताम्।।

***

# मदीयं भारतं वर्षम्

धरित्रीस्वर्गकुलसञ्ज्ञं
मदीयं भारतं वर्षम्।

श्रुतिस्मृत्यादिभिः शास्त्रैः
पुराणैः सेतिहासाद्यैः
तथा स्वर्गस्थितैर्नैकैः
सुरैरीशावतारैश्च
महाचार्यैः सुविख्यातैः
सुधीभिर्यन् महाकविभिः
प्रगीतं मुक्तकण्ठं तन्
मदीयं भारतं वर्षम्।। धरित्रीस्वर्ग....

किरीटं पादपीठञ्च
हिमाद्रिश्च महाब्धिश्च
स्रवन्त्यः कण्ठमणिहाराः
भुवो राज्याभिषेकार्हाः
निसर्गोद्भावितैश्वर्यं
किमप्येकान्तमाश्चर्यं
प्रकृत्या ख्यापितोत्कर्षं
मदीयं भारतं वर्षम्।। धरित्रीस्वर्ग....

सुखेनाऽव्यर्थमुन्मत्तं
तथा दुःखेन सन्तप्तं
सदा प्रतिबोधयन्तीभिः
चिरायाश्वासयन्तीभिः
वसन्तग्रीष्मवर्षाभिः
शरद्हिमशिशिररूपाभिः

समाश्रितमेकमृतुततिभिः
मदीयं भारतं वर्षम्।। धरित्रीस्वर्ग....

असूर्यम्पश्यमिव सुप्तं
प्रगाढे तमसि सङ्गुप्तं
यदासीन् नोऽसदथ नो सत्
समस्तं विश्वमेतत् तत्
तदा भ्राजत्प्रकाशात्मं
घनीभूतप्रबोधाढ्यं
समुदितं मित्रवन्मित्रं
मदीयं भारतं वर्षम्।। धरित्रीस्वर्ग....

अहो सामाजिकं न्यायं
मनुष्यस्याधिकारञ्च
समुत्पाट्यादिमावासान्
प्रगाढं स्वैरमध्यस्तैः
दिशद्भिर् विस्मृतं ससुखं
समग्रप्राणिनां क्षेमं
तदेतद् गीतयाऽगायन्
मदीयं भारतं वर्षम्।।

धरित्रीस्वर्गकुलसञ्ज्ञम्
मदीयं भारतं वर्षम्।।

***

# सैका श्रितिः

कापि दिव्याऽतिनव्याऽनवद्याऽऽकृतिः।
गान्धिवर्य! प्रिया तावकीयं सृतिः।।

स्वार्थलिप्सामदभ्रष्टतायौवना–
रूढकूलङ्कषाया महासम्प्लवे।

मज्जमानस्य लोकस्य सैका श्रितिः
नौरिवाश्वासिनी तावकी संस्मृतिः'' ।।
काऽपि दिव्या....................................

सत्यसूर्ये महाज्ञानमेघावृते
शुभ्रचारित्र्यदारिद्र्यदुःस्थे युगे।
सूचिभेद्यान्धकारेऽस्ति शस्ता गतिर्
मूर्ततेजस्वितायाः सैका द्युतिः।।
काऽपि दिव्या....................................

सत्यमार्गो नु किम्? धर्ममार्गो नु किम्?
योगमार्गो नु किम्? क्षेममार्गो नु किम्?
दिग्विमूढाय लोकाय विद्युल्लता
गान्धिसूक्तिर्नवा साऽस्ति दिव्या श्रुतिः।।
काऽपि दिव्या....................................

''आदिकाव्यं यथा भाति रामायणं
मेघदूतं नु वा गीतगोविन्दकम्।
अश्रुतोऽचिन्तितोऽतर्कितोऽकल्पितस्
त्वेष सत्याग्रहः काव्यरूपा कृतिः।।
काऽपि दिव्या....................................

ब्रह्मतेजो बलं क्षत्रतेजो बलं
प्राक्तनोऽयं विवादस्तु नैकं बलम्।
आत्मनो यद्बलं तद्बलं सद्बलं
गान्धिवृत्तं समाघ्राय सैका मितिः।।
काऽपि दिव्या....................................

***

# स्वागतं ते वसन्त!

विश्लेषं ते मरणसदृशं तं कथञ्चिद् वहन्त्या
क्लान्ताऽवन्या तुहिनरचितं कञ्चुकं यत्पिनद्धम्।
औशीरं वा ऋतुकुलपते! भूधरो रोजयोस्तद्
गात्रस्पर्शः शिथिलयति ते कैतवेनार्करश्मैः ।।

वारं वारं मदनरचिते तप्तनिश्श्वाससूत्रे
ओतप्रोतैः स्मरणकुसुमैर्जीवनाधारभूतैः।
माल्यं हार्दं ग्रथितमनया, निष्ठुरं धूननेन
धूलिं किं वा विसृजति शनैश्चर्चितं स्वाङ्गरागम्।।

कामं कामं प्रकृतिमृदुलो हन्त योऽसौ वसन्तो
गाढं शीतं स्खलितविभवं सत्तयैवाकरोद् यः।
सम्प्रत्येष प्रतिभटभटोऽप्याणवीयास्त्रसज्जो
गर्जं गर्जं बहुविधमहो तं न जेतुं समर्थः।

धूमाङ्गारैः कलियुगकृतैर्यान्त्रिकैर्निश्श्वसन्तीं
दृष्ट्वा शेषे किमतिविकलां रङ्गभूमिं स्वकीयाम्।
कुण्ठीभूतप्रहरणबल! स्निग्ध कुसुमायुधस्य
सोत्साहं ते कथमिव सखे स्वागतं व्याहरामि।।

व्याप्ताऽऽकाशे दिशि दिशि च सा हन्त कालुष्यकान्तिः
प्राप्तं पश्य महितसरितां सज्जलं कज्जलत्वम्।
तस्माद् यावत्तव यतनतो दूषणं भूषणं स्यात्
सोत्साहं ते कथमिव सखे स्वागतं व्याहरामि।।

जाड्याकाशे ह्यवगतिदिशस्सन्ति मालिन्यवेशाश्
चान्द्री शोभा कथयति नु किं सूर्यरश्मिश्च किं वा।
नाऽहं जाने, तव च वसतिम्, कोकिलालापदौत्य!
प्राप्तोऽसि त्वं कथमपि ततस्स्वागतं ते वसन्त!।।

***

# समायाति मन्दं वसन्तो दिगन्तः

समायाति मन्दं वसन्तो दिगन्तः
विशति मन्दमन्दं वसन्तो हृदन्तः।।

मदनतन्त्रमन्त्रोऽभियानेष्वतन्द्रः
वशीकारधिक्कारतन्त्रस्वतन्त्रः
प्रणयवृक्षसेकक्रियायामतन्द्रः
स कान्तः प्रणयिनां विरहिणां दुरन्तः
समायाति मन्दं वसन्तो दिगन्तः
विशति मन्दमन्दं वसन्तो हृदन्तः।।

सरति सुखकरोऽसौ समीरोऽनुतीरं
स्पृशति मृदुलमृदुलं शरीरं शरीरं
प्रगाढं च मथ्नात्यधीरं च धीरम्
सुभीमोऽपि कान्तः समेषां वसन्तः
समायाति मन्दं वसन्तो दिगन्तः
विशति मन्दमन्दं वसन्तो हृदन्तः।।

प्रवेपथुमतीं पश्य पृथिवीवधूटीं
सुपीतांशुकामथ हरितवर्णशाटीम्
मनोहर्षसूचकविकचपुष्पवाटीं
भवेयुर्न मुग्धाः सहृदयाः कियन्तः
समायाति मन्दं वसन्तो दिगन्तः
विशति मन्दमन्दं वसन्तो हृदन्तः।।

सुभव्याम्बरस्त्वम्बरश्रीनिधानः
सुतनुदीप्तिमानः सुतिमिरावसानः
अमन्दं चकास्त्यद्य विभ्राजमानः

स चन्द्रः कुपितकामिनीमानहन्ता
समायाति मन्दं वसन्तो दिगन्तः
विशति मन्दमन्दं वसन्तो हृदन्तः।।

सुपुंसां सुपुंसां यशांसि यशांसि
सुयशसां सुयशसां मनांसि मनांसि
सुमनसां सुमनसां तमांसि तमांसि
प्रवर्द्धय पवित्रय विदारय वसन्त!
समायाति मन्दं वसन्तो दिगन्तः
विशति मन्दमन्दं वसन्तो हृदन्तः।।

***

# हे वर्षासुकुमारि!

चञ्चच्चञ्चलचञ्चलाञ्चले!
हे वर्षासुकुमारि!

त्वमस्यमृतदीधितिसहोदरी
लावण्याब्धिसुता रसेश्वरी
महनीया महिता महेश्वरी
सान्द्रमसृणघनश्यामकुन्तले!
हे वर्षासुकुमारि!

मन्द्रमदिरकाकलिनिस्वनने!
मन्दसुरभिमारुतनिःश्वसने!
श्यामे! ब्रूहि त्वमसि किं मुग्धा
यौवनदेहलिधृतपदकमले!
हे वर्षासुकुमारि!

त्यज नन्दनवनिकाभिनिवेशम्
एहि, सनाथय नयननिवेशम्
इतो दृशं विशदं त्वं क्षेप्स्यसि
मनसि त्वद्विरहदहनसङ्कुले!
हे वर्षासुकुमारि!

प्रासादेषु यथा वं मुह्यसि
तथा कुटीष्वपि प्रसभं स्निह्यसि
वर्ष झमाझम हे समदर्शिनि!
मेरौ यथा, तथा मरुस्थले!
हे वर्षासुकुमारि!

दिक्षु विदिक्षु प्रदीप्तो वह्निः
अन्तर्बहिः समन्ताद् वह्निः
शीतमपाङ्गनिपातं प्रेरय
त्रिविधतापशमनाय वत्सले!
हे वर्षासुकुमारि!

***

# शारदी रजनी

दिशि दिशि रूपकरीं विकिरन्ती
हृदयं हरति शारदी रजनी।

खचिततारकं हृदयहारकम्
शुभ्रचन्द्रिकाक्षौमशाटकम्
धृत्वाऽशब्दं पदं न्यसन्ती
निखिलचेतनाया आहरणी।
हृदयं हरति राजती रजनी।

मधुमृद्वीका चतुरचन्द्रिका
कुपितकामिनीकोपकर्षिका
भग्नहृदामाशा गवाक्षिका
चित्रेयं चलचित्तरञ्जनी।
हृदयं हरति राजती रजनी।

अवगुण्ठनमपनय मा मा सखि
रूपं निर्वसनं कुरु मा सखि
पटसङ्क्रमिता छविः प्रायशः
कथयति शिष्टकथामभिभवनी।
हृदयं हरति राजती रजनी।

चञ्चच्चन्द्रमुखी मदयन्ती
समायाति सस्मितं नयन्ती
स्वर्णिमकरतः स्वर्णिमकलशम्
यौवनमधुमदिराविक्रयिणी
हृदयं हरति राजती रजनी।

तेऽभिनन्द्य सुमुखि मुखशुचिताम्
नित्यामिवप्रसन्नतान्विताम्
सकलेयं जनमनःसन्ततिः
प्रसन्नता–याचना–प्रणयिणी
हृदयं हरति राजती रजनी।

***

# रसघन!

रसघन! रसघनचयान् अभिवर्षय वर्षय
सहृदयहृदयस्थलीरभिपर्णय पर्णय

अन्तरङ्गनाथ! भुवन–
रङ्गनाथ! रङ्गनाथ।।
करुणतातरङ्गनाथ!
करुणतां तरङ्गय, तरङ्गय।।

रसघन। रसघनचयान् अभिवर्षय वर्षय
सहृदयहृदयस्थलीरभिपर्णय पर्णय

कवितावनिताकलासु
हृदयहरणपटुतरासु।
बहुविधासु तासु तासु
कमपि रसं मिश्रय, मिश्रय।।
रसघन! रसघनचयान् अभिवर्षय वर्षय
सहृदयहृदयस्थलीरभिपर्णय पर्णय

तुहिनक्षततामरसम्
पूतिकपर्युषितरसम्।
नवरसघनसिञ्चनेन
जीवनमभिपूरय, पूरय।।

रसघन! रसघनचयान् अभिवर्षय वर्षय
सहृदयहृदयस्थलीरभिपर्णय, पर्णय।।

***

# अनन्तं पदम्

कोऽपि सुविज्ञो दिशतु दिशं मे।
नूतननिर्मलविशददिशं मे।।

संसृतिरचनारूपं चित्रम्,
मानवतायाथात्म्यं चित्रम्,
जननं चित्रं मरणं चित्रम्,
चित्रत्वं प्रदिशतु विशदं मे ।।
कोऽपि सुविज्ञो..................

सृष्टिरहस्यरज्जुतो बद्धम्,
प्रबलसहजसंस्कारनिबद्धम्,
निर्लक्ष्यताशापद्भिर्बद्धम्,
जीवनमिदम्, दिशतु लक्ष्यं मे।।
कोऽपि सुविज्ञो..................

वृद्धास्त्वेते रूढिसुबद्धाः,
प्रियप्राचीना नूत्नविरुद्धाः,
किं वा ते निर्देष्टुं शक्ताः,
नवं वर्त्म प्रस्फुटतु स्वयं मे।।
कोऽपि सुविज्ञो...................

केचन प्रश्ना अतिप्राचीनाः,
सार्वकालिकाः सार्वजनीनाः,
अरुन्तुदास्ते नित्यनवीनाः,
एकं दिशतु कोऽपि किरणं मे ।।
कोऽपि सुविज्ञो...................

इच्छत्यमरत्वं सर्वः खलु,
इच्छा सकर्मिकाऽस्ति यतः खलु,
इष्टमतः सत् क्वचिद् विलीनम्,
तदिदमनन्तं दिशतु पदं मे।।
कोऽपि सुविज्ञो दिशतु दिशं मे
नूतननिर्मलविशददिशं मे।।

***

# अवगुण्ठनम्

अवगुण्ठनमपनयति सुवदना,
उषा मुग्धकलवचना।

युवतेर् लज्जा रुचिरा सज्जा
प्रियतमवरजिज्ञासा हृज्जा
अवगुण्ठनमुत रूपरहस्यं
स्वर्णझरी किमु सघना।।

अवगुण्ठनमपनयति सुवदना,
उषा मुग्धकलवचना।

अविदितयौवनमदा प्रमुग्धा
अकलुषरूपविलासविदग्धा
विग्रहिणीव चारुता स्निग्धा
अपत्रपाऽरुणवदना।।

अवगुण्ठनमपनयति सुवदना,
उषा मुग्धकलवचना।

लोकय शतदलवरं सुपर्णं
त्वच्छविधनं सुवर्णसवर्णम्
मदयद् रूपं भृशमनुरक्ता
मुग्धशिलीमुखललना।।

अवगुण्ठनमपनयति सुवदना,
उषा मुग्धकलवचना।

प्रत्युद्गच्छ प्रियं प्रियतरं
द्वारि संस्थितं रतं दिनकरं
प्रणययाचनाप्रसृतकरतलम्
न करु विलम्बनमधुना।।

अवगुण्ठनमपनयति सुवदना,
उषा मुग्धकलवचना।

त्यज परिवेशं त्यज परमेशं
भज हृदयेशं भज हृदये शम्
चिरप्रणययाचकं कृतार्थं
कुरु सम्प्रति रतिनिधिना।।

अवगुण्ठनमपनयति सुवदना,
उषा मुग्धकलवचना।

# अवनी प्रमदवनी

पल्लविनी फलिनी विलासिनी
अवनी प्रमदवनी।

धृत्वा प्रतनुतुषारावरणम्
आविष्कृत्य रूपप्रस्रवणं
रामं रामं रमते प्रकृतिः
मदयद्यौवनकलशाभरणी
अवनी प्रमदवनी।

क्षीरोदधिस्नात इव हंसः
अन्तर्हितपङ्कजावतंसः
दीव्यद् दीव्यद् दीव्यति दिवसः
मुह्यन्तीयं मुह्यति रजनी
अवनी प्रमदवनी।

विकसत्सुमनोमनोवाटिका
सुष्ठु समुद्घाटितकपाटिका
दिशि दिशि वितरत्यवगतिसुरभिं
सुधादानदक्षेव मोहिनी
अवनी प्रमदवनी।

समीरणस्तत्तत्स्वरसदृशं
वंशीतानं तनुते सरसं
रतिरागं गायति मृदु गगनं
छलिकं नृत्यं नृत्यत्यवनी
अवनी प्रमदवनी।

दुःखं सत्यं तत्त्वमन्तिमम्
सुखं दुःखविस्मरणलक्षणम्
मुरलीं मुखरय यथा जागृयाद्
विस्मृतिरियमवसादविजयिनी
अवनी प्रमदवनी।

***

# प्रस्थितोऽसि विदेशम्

प्रिय! दैन्यं दशा मम याति रे
प्रस्थितोऽसि विदेशम्।।
श्वश्रूश्वशुरौ किमपि वदेताम्
भृकुटिं कुटिलां मयि क्षिप्येताम्
मम भृकुटिश्चला त्रुटिं याति रे
प्रस्थितोऽसि विदेशम्।।
प्रिय! दैन्यं दशा............

कृशमध्या प्रिय! प्रिया तवाऽहं
विरहशैलकूटाऽऽक्रान्ताऽहम्
मम तन्वी कटिः त्रुटिं याति रे
प्रस्थितोऽसि विदेशम्।।
प्रिय! दैन्यं दशा............

यासि चेन् मामपि नय दूरं
गौरीभ्यो वा तिष्ठ विदूरम्
मम हृदयं द्रुतं त्रुटिं याति रे
प्रस्थितोऽसि विदेशम्।।
प्रिय! दैन्यं दशा............

कान्तस्त्वं कन्तेयं रमणी
पुत्रस्त्वं पृथिवीयं जननी
विश्वासो दृढः त्रुटिं याति रे
प्रस्थितोऽसि विदेशम्।।
प्रिय! दैन्यं दशा............

यासि चेत् त्वं याहि सकामं
राष्ट्रायाऽर्जय निरुपममानं
तव पन्था शिवम् उपयाति रे
प्रस्थितोऽसि विदेशं
प्रिय! दैन्य दशा............

# काकोऽहमस्मि

क: कोऽहमस्मि ? क: कोऽहमस्मि ?
काकोऽहमस्मि, काकोऽहमस्मि।

शृणु चेत्पृच्छसि जिज्ञासाया:
क: कोऽहमस्मि ? क: कोऽहमस्मि ?
सत्यं ब्रवीमि यो योऽहमस्मि
काकोऽहमस्मि, काकोऽहमस्मि।

काकत्वे हास्यं किमिति मित्र!
हंसत्वे श्लाघ्यं किमिति मित्र!
कत्वे हत्वे किं वरं मित्र!
किमिदं किमिदं त्वं हससि मित्र!
हसनीयशेमुषीसरणिजुषां
पुंसां स्वान्तःशोधकोऽहमस्मि।
क: कोऽहमस्मि? क: कोऽहमस्मि?
काकोऽहमस्मि, काकोऽहमस्मि।

रङ्गैरखिलैरभिभवनीयं
रूपं धवलं त्वं वहसि हंस!
त्रिष्वपि कालेष्वधृष्यरूपं
कृष्णं काकं त्वं हससि कंस !
निजदलपरिवर्तनशीलानाम्
निजतानिष्ठाशासकोऽहमस्मि ?
क: कोऽहमस्मि ? क: कोऽहमस्मि ?
काकोऽहमस्मि, काकोऽहमस्मि।

अफ्रीका मे मूलो देशः
कृष्णो मे सकलः परिवेशः
विश्वस्मिन् विश्वे पर्यटामि
स्वैरं निन्दास्तुतिवित्तेशः।
जनमानसगतरतिविरतीनां
प्रस्फुटं परीपाकोऽहमस्मि।
कः कोऽहमस्मि ? कः कोऽहमस्मि ?
काकोऽहमस्मि, काकोऽहमस्मि।

कृष्णताऽभिमानध्वजलिङ्गः
मानवतामूल्यमेरुशृङ्गः
हिंसितो धवलचरितैर् हंसैर्
बन्धुर्मार्टिनलूथरकिङ्गः
मानवतानाममात्रजापक !
मानवतारूपनामकोऽहमस्मि।
कः कोऽहमस्मि ? कः कोऽहमस्मि ?
काकोऽहमस्मि, काकोऽहमस्मि।

***

# निद्रा गता मम नयनयोः

विमुखे त्वया नयने कृते
निद्रा गता मम नयनयोः।
वदने च जाता पाण्डुता
ननु सार्द्रता मम नयनयोः।।

किं किं न वक्तुमभीप्सितम्
किं किं न हन्त मनीषितम्।
यदनुक्तमपि नु विवक्षितं
दीपकशिखा मम नयनयोः।।

सन्तमसमसि मम नयनयोर्
असि वद नु लोचनचन्द्रिका।
दृग्धारभारविजृम्भितम्
उत दुर्दिनं मम नयनयोः।।

मम वेदना त्वं वा पुनर्
आयाति कोऽत्र शनैः शनैः।
छादयति हृदयं निक्षिपन्
तिमिरं ततं मम नयनयोः।।

अयि वेदने! त्वं प्रेयसी
प्रेयसि! शुभा त्वं वेदना।
मानं च तत्र विलोक्यतां
तदनन्यतां मम नयनयोः।।

***

# किं करवाणि क्व यानि

किं करवाणि क्व यानि ?
प्रियतम! किं करवाणि क्व यानि ?

सकलो दिवसः कथमपि नीतः
कालतिरस्करिणीं हा धृत्वा
संस्मरणे प्रविशति सति हृदये
निशि कथमिव निद्राणि?
किं करवाणि क्व यानि?

स्मृतिशीतो वायुर्मन्दं
प्रवहतिं किं वा प्रदहति मन्दं
तपति च हृदयं मन्दं मन्दं
कथं हन्त शमयानि?
किं करवाणि क्व यानि ?

लोचनधारा जलधरधारा
अथवा सेयं कविताधारा
तृषिते हृदये केयं धारा
हा कथमिव सिञ्चानि ?
किं करवाणि क्व यानि ?

कुत्र निमग्नो विस्मृतिचित्तः
संस्मरामि किं संस्मृतिवित्तः
स्मृतिदग्धो विस्मृतिसिक्तः
ग्रथये कानि सुमानि ?
किं करवाणि क्व यानि ?

रम्ये दृश्ये द्युतिं त्वदीयाम्
रम्ये श्रव्ये श्रुतिं त्वदीयाम्
रम्ये रम्ये छविं त्वदीयाम्
प्रेक्षे, किं करवाणि ?
किं करवाणि क्व यानि ?
प्रियतम! किं करवाणि क्व यानि?

***

# अनुशासनमेव वरं वृणु त्वम्

अथ योगक्षेमकरं मन्त्रम्
अनुशासनमेव वरं वृणु त्वम्।

उत्कृष्टपदप्रेप्साक्रान्तम्
दिग्भ्रान्तं श्रान्तं वीक्ष्य माम्
करुणेनान्तःकरणेन तदा
तमसो ज्योतिर्नयता प्रोक्तम्
अथ योगक्षेमकरं मन्त्रम्
अनुशासनमेव वरं वृणु त्वम्।

अभिलषितशतं हृदये निहितम्
लभ्यं तच्छकलं न तु सकलम्
कथमिच्छाभारभराक्रान्तः
खिद्यसे विहाय वरेण्यं त्वम्
अथ योगक्षेमकरं मन्त्रम्
अनुशासनमेव वरं वृणु त्वम्।

उपनेता नेता परनेता
कुलपतिश्शिक्षकस्त्वध्येता
सर्वस्त्वुपदिशन् विहितकृत्यः
अनुशासनस्य तदिदन्त्वमिदम्
अथ योगक्षेमकरं मन्त्रम्
अनुशासनमेव वरं वृणु त्वम्।

तुष्टिं तृप्तिं शान्तिं क्षान्तिम्
मुक्तिं भुक्तिं सिद्धिं वृद्धिम्
ऋद्धिञ्च जीवने चेदिच्छसि
न कदापि विफलतां चेदिच्छसि

अथ योगक्षेमकरं मन्त्रम्
अनुशासनमेव वरं वृणु त्वम्।

संयमसञ्ज्ञं संसिद्धिकरम्
अनुशासनमेव सुयोगकरम्
अनुशासनमेव क्षेमकरम्
अथ योगक्षेमकरं मन्त्रम्
अनुशासनमेव वरं वृणु त्वम्।

***

# बौण्डीग्रामः

स्वप्नः कश्चन मनोऽभिरामः
अहो मदीयो बौण्डीग्रामः।।

भारतवर्षस्योत्तरदेशे
बहराइचजनपदे सुवेशे
घर्घररवा घाघरा प्रवहति
क्वचित्पीडयति क्वचित्प्रीणयति
नदीमातृकः क्षेत्रललामः
अहो मदीयो बौण्डीग्रामः।।

रामस्नानपुण्यजलधरा
सरयूस्तत्र च साऽत्र घाघरा
प्रवहति घर्घरनादाऽजस्रं
शिशिरः पवनो मनः पवित्रं
विहरति सिते सैकते श्यामः
अहो मदीयो बौण्डीग्रामः।।

शस्यश्यामा धरा सलज्जा
पिहिताऽनया मनोज्ञा सज्जा
आम्रमञ्जरीमधुसौरभ्यम्
मलयानिलवलितैरुपलभ्यम्
वसति वसन्तस्त्वत्र सकामः
अहो मदीयो बौडीग्रामः।।

स्वातन्त्र्याग्नौ निजमुत्सर्गं
बौण्डीनृपश्चकार सहर्षम्
मातृभूमिभक्तस्य कस्य नो
गौरवबुद्ध्या मनः सगर्वं
कोष्णः क्रान्तिक्रीडारामः
अहो मदीयो बौण्डीग्रामः।।

अस्मद्वंशस्यात्र संस्कृतिः
अत्रैवाऽस्य च रूपसंस्मृतिः
यस्मिन् परमपूरुषे विलसति
योगीशं तं जनः संस्मरति
महाराज इति गेन्दारामः
अहो मदीयो बौण्डीग्रामः।।

पितामहैर्मे विबुधस्मर्यैः
पण्डितगौरीशङ्करवर्यैः
सदाचारसद्गुणावदातैः
गिरिधारीलालार्यैस्तातैः
शिष्टे पथि लब्धो विश्रामः
अहो मदीयो बौण्डीग्रामः।।

भारतराष्ट्राध्यक्षमानितः
दिशि दिशि यशोविभूतिभूषितः
बौण्डीध्वजमिव वहति तपस्वी
श्रीमद्बच्चूलालोऽवस्थी
अङ्गीकृतसज्जनप्रणामः
अहो मदीयो बौण्डीग्रामः।।

श्रुतिधारानिष्णाता बौण्डी
सकला सफला सबला बौण्डी
सेयमिदानीं विकला जाता
दयनीयतां दीनतां याता
यथा पुनः स्वं रूपमाप्नुयात्
तथा प्रसीदत्वात्मारामः
आत्मारामो गेन्दारामः
जयतु मदीयो बौण्डीग्रामः।।

***

# तद्धि युद्धं विचिन्त्यम्

(१)

पत्रं लब्ध्वा स निजगृहिणीमुग्धहस्ताङ्कितं तत्
तिष्ठन् दूरे हिमगिरितटे सैन्यसंयोजनायाम्।
वीरः कश्चिद् रिपुदलगतौ सर्वदा दत्तदृष्टिर्
भार्यामार्यां हृदयगगने पत्रशब्दैर्ददर्श।।

## अथ पत्रस्य प्रथमं पुटम्

(२)

वार्तैषाऽद्य श्रुतिपथगता तप्ततैलादिवद् यत्
सीमां भित्वा प्रकृतिसुभगे छम्बसञ्ज्ञे प्रदेशे।
वध्यैस्तैस्तैर्भरतविदिता जन्मभूमिः प्रविष्टा
सन्नद्धस्त्वं स्मरणसमरे तावता प्राणनाथ!।।

(३)

चिन्ताग्रासात् सुरभिविपिनं सज्जितं त्वत्कराभ्याम्
आश्रित्याऽऽरान्निजनयनयोश्चाकुलं ध्वान्तराशिम्।
दूरे कृत्वा नयनसलिलाच्छुभ्रमूर्तिर्मयैवं
दृष्टोऽसि त्वं कुशकुसुमयोः शत्रुजिन् मानुषश्च।।

(४)

दृष्ट्वा किञ्चन्मलिनवदनां माममात्वं व्रजन्तीम्
अत्रैवोक्तं कुसुमलतिकां स्वं च रक्षेः प्रिये ! मे।
व्यर्थं स्याद् यन्नयनसलिलं तद्धि वित्तं मदीयं।
दाहास्त्रं यत् त्वमथ नयसीत्येवमुक्तस्तदाऽऽसीः।

(५)

सेनायास्त्वं पतिरसि सखे! मेऽपि, कृत्यं महत्ते
नाऽहं चिन्त्या विपदि भवता शाश्वती संहिता नौ।
रक्षाऽऽत्मानं कथमपि यतो मातृभूम्याश्रयस्त्वम्
माताऽव्याजं जनयति सुतं प्रेयसी स्वार्थिनी स्यात्।।

(६)

चिन्तायां ते सततनिरता त्वन्मयी त्वद्गताऽहं
भूयः क्षोभं मनसि गमिता त्वद्विपत्तिं प्रपठ्य।
स्वार्थो मे स्यान्निरतिशयितं यन्ममत्वं मम त्वं
हेतोरस्माद् व्यथयति भृशं तद्धि युद्धं विचिन्त्यम्।।

(७)

एका भूमिर्मनुजजननी निश्छला सर्ववन्द्या
खण्डं खण्डं खननपटुना स्वाऽऽधिपत्यस्य लब्ध्यै।
केनाऽकारि? प्रथिततनुजः कश्चिदासीदवश्यं
पाकिस्तानी क्वचिदवगता भारती कुत्रचित्सा।।

(८)

भूयो भूयस्त्वमुपदिशसे मानुषत्वं हि रक्ष्यं
शस्त्रं नीत्वा कथमिव भवेन् मानुषत्वस्य रक्षा।
धर्मो धर्मः प्रलपति जनः सोऽप्यनाघ्रातधर्मः
क्वाऽसौ धर्मो धरति धरणीं क्वाऽस्ति खड्गादिसज्जः।।

(६)

नेदं नूत्नं यदिह सुकृतं मन्दिराणां विनाशाच्
चर्चस्थानं बमविषमितं ह्येष धर्मस्तदीयः।
नाशः कुत्र प्रिय! सुलिखितो मस्जिदानां कुराने
धिग्धिग्धर्मं धरति विविधं यः स्वरूपं यदृच्छम्।।

(१०)

मानुष्यं किम्? क इति मनुजो? जीवनं नाम किम्? को
धर्मश्चोक्तोऽविरतमिह यान् स्तौमि निन्दामि चाऽहम्।
बुद्ध्यर्थं मे रहसि निहितं वर्तते यद्धि सत्यं
गोप्यानां तां दिशि दिशि गुहां कल्पयेऽहं हि दुर्गाम्।।

(११)

ईशो मा भूत्तदधिगमने कल्पनाया गुरुत्वान्
नो वा चिन्त्यः कथमपि यतस्तस्य सत्त्वेऽपि किं स्यात्।
एवं चेद् हा मनुजजनुषो ज्योतिरालम्बनं यत्
तस्माद् गाढे तमसि नयते बुद्धिवादप्रतापः।।

(१२)

भावाऽभावौ परमपुरुषाऽऽविष्कृतौ कल्पयन्तां
किञ्चाऽन्येषामिह न हि मया चिन्तनं चिन्तनीयम्।
संसारेऽस्मिन् कथमपि सखे! नाऽवलोक्याऽर्थवत्तां
तस्मिन्नेव प्रतनुकिरणे साश्रया चित्तवृत्तिः।।

(१३)

अर्हा बुद्धिर्नियतविषये माननीया स्वभूमौ
बुद्धेर्वादं कमपि सततं नित्यनूत्नं विवक्षुम्।
वन्दे वन्दे पुनरपि पुनः मानवो यद्वशोऽयं
प्राप्तं हित्वा गगनकुसुमं प्राप्तुमुद्बाहुरस्ति।।

(१४)

ऊढिर्नूनं सुखयति भृशं भोग्यलब्धिश्च कञ्चित्
काव्यं कश्चिद् रचयति मुदाऽन्यश्च सङ्गीतमग्नः।
ध्यानं कश्चिद् हृदि वितनुते ब्रह्मरूपाऽऽत्मकं यन्
मन्ये दृष्ट्वा जनुषि गुरुतां ते पलायन्त आरात्।।

(१५)

दुःखोदर्कं जगति सकलं यच्च दुःखाऽनुभूत्या
नाऽऽक्रान्तं तत् कथमिव भवेज् जीवनं वा जगद् वा।
दृष्टिः स्याद् वा प्रकृतविषये पक्षपाताऽऽकुला मे
मन्ये यद् यत् सुखमिव यतो भ्रान्तिमूलं हि तत्तत्।।

(१६)

नो वा जाने किमपि जनुषः? किञ्च? सत्यं शपेऽहं
हेतोरस्मात् कथमपि वरं नाऽस्य वैयर्थ्यशङ्का।
आध्यात्मं वा मनसिजकृतं मौक्तिकं भौक्तिकं वा
यद् वा तद् वा जनुषि निखिलं प्राप्यमानन्दरत्नम्।।

(१७)

कश्चिद् ब्रूते पशुखगकुलैः स्निग्धसाजात्यभावं
कश्चिद् ब्रूते प्रकृतिकृतिभिः शुभ्रतादात्म्यभावम्।
यावन्नाऽऽस्ते निखिलनृकुले नः सजातीयभावो
वागारम्भो भवति निखिलं तद्धि किं वा प्रलापः।।

(१८)

नीत्यै युद्धं भवति नियतं सा हि रक्ष्या सुरक्ष्या
नो सा नीतिः विपरिणमते या प्रतीकारबुद्ध्या।
शान्तिः शान्तिः प्रथममवदद् यः स्वदूतैः कपोतैर्
युद्धं युद्धं क्वणति सततं तीक्ष्णशस्त्रैः कुघातैः ।।

(१९)

यस्यां नित्यं विपरिणमनं नाऽस्ति किञ्चिच्च तस्या
नीतेर्मूलं समरमिति चेन् नो ह्यनीतिस्तदा सा।
चीनीया सा परिलसति चेद्, राष्ट्रगीतं प्रमाणं,
संहारं याऽऽह्वयति परमं मानुषाणां न नीतिः।।

(२०)

बाल्ये काले श्रुतमिति मया केनचिन् मन्त्रशक्त्या
व्याघ्रः सृष्टोऽभवदथ च सा तत्क्षणं तस्य वृत्तिः।
शक्तेर्मोहादहमहमिकामोहितोऽण्वस्त्रसृष्ट्या
मन्ये शाखां स निजशरणां मन्दबुद्धिश्छिनत्ति।।

(२१)

नो युद्धाऽर्थं कथमपि मता युद्धसज्जाऽस्मदीया
युद्धत्रासो जनयति शमम्, भो! भये कुत्र शान्तिः।
स्वोक्तेर्घातं सततमविदन् माद्यति ज्ञानमूढः
स्वार्थं नीत्वा प्रचलति यतस्तर्करीतिस्तदीया।।

(२२)

त्यक्त्वा भार्यां कथमपि तथा मातृपुत्रांश्च हित्वा
वृत्यै सैन्या निजकृतिपरा नो चिकीर्षन्ति युद्धम्।
चिन्त्यं नित्यं प्रिय! सुमनसा यद्धि कालं कियन्तं
योत्स्यन्ते ते घृणितसमरे व्याजतो राष्ट्रभक्तेः ।।

(२३)

सद्हेतुर्यः कथमपि भवेन्नाऽस्ति युद्धे कुबुद्धेः
स्वार्थप्राप्त्यै सकलयतनं तेषु युद्धं विरोधे।
हन्त स्वार्थो नियमयति तान् धर्मकामाऽर्थमोक्षान्
स्वार्थो मूलं फलमपि तथा सोऽस्ति सर्वत्र हेतुः।

इति प्रथमं पुटम्

## अथ द्वितीयं पुटम्

(२४)

सैषा चिन्ता व्यथयति भृशं वर्द्धिता या मया सा
याता शान्तिः सह च समरे वाटिकायास्त्वया किम्?
क्षुब्धं चित्तं भवति नितरां किञ्च यात्यव्यवस्थां
किं वा कुर्यामिति हतमतिः स्वप्रकोष्ठं गताऽहम्।।

(२५)

शूराणां तु प्रतिभटघटाभेदनाद् भावितानां
भित्तौ दृष्ट्वा प्रसृतयशसामत्र चित्राणि तेषाम्।
भावो नूनं विशति हृदये मामकीने विचित्रो
नृत्यत्यग्रे मम नयनयोश्चाऽथ यौद्धो विपाकः ।।

(२६)

आपत्तौ चेत् पतति नितरां जीवनं ते धनं मे
तस्मात्क्रीत्वा परमकृपया गौरवं मे ददीथाः।
कादाचित्कं ननु जनुरिदं वः प्रसङ्गेन वच्मि
प्रायो दारा सुपतिधनिनस्तद्गुरुत्वात् कृतार्थाः।।

(२७)

'अब्दाली' 'नृपनादिरो' 'गज़नवी' शिष्या अनल्पास्तथा
नीयन्ते स्मृतिवीथिकासु सुचिरं धर्मान्धतालिङ्गिताः।
सन्ध्यायामवलोक्यते तदुदिता ह्यद्यापि रक्तच्छटा
नैशीथेऽपि च सूचिभेद्यतमसि प्रध्वंससंस्तब्धता।।

(२८)

व्याप्ते युद्धे महति महतामद्वितीये द्वितीये
मृत्योर्नृत्यं प्रतिभयमभूद् यच्च कालस्य कृत्यम्।
शिष्टध्वंसामनितरकृतां वीक्ष्य सम्पत्तिकाष्ठां
पोलैण्डीयां तु करुणदशां याति चित्तं मदीयम्।।

(२९)

श्रान्तः क्लान्तः कठिनकृतिभिश्शन्तिकामी स्वकार्या–
दागत्याऽसौ विलपति भृशं वीक्ष्य नष्टं निवासम्।
सा मे भार्या गगनसमराद् हा हता वा मृता वा
विद्यास्थानं प्रति गतवती बालिका मामिका क्व?।।

(३०)

पृच्छत्यन्यः सजलनयनो रक्षिणं ज्ञानशून्यो
हा मेऽहन्ता हरिणनयना स्वर्णवर्णा सुवर्णा।
कार्याऽऽगारं मयि गतिवति क्वाऽपि लुप्ता विलुप्ता
भो भो रक्षिन्! नयनपदवीमागता किं त्वदीयाम्।।

(३१)

प्रष्टव्यास्ते कलुषितधियो मत्तपाश्चात्यदेशाः
शत्रुत्वं चेन् मनसि नितरां कैश्चिदासीत्, किमर्थम्?
उत्पत्तेः प्राग् जनिरपहृता भाविसत्सन्ततीनां
नागासाकी ह्यनुभवति कं स्वाऽपराधं तपस्वी ।।

(३२)

ऊढ्वा सर्वो जगति लभते हार्दमानन्दपुञ्जं
वाञ्छन्तौ च प्रणयकृपणौ नव्यदाम्पत्यसौख्यम्।
चिन्ताऽऽक्रान्त्या प्रतिपदमहो बाधितौ दम्पती तौ
नागासाकी ह्यनुभवति कं स्वापराधं तपस्वी ।।

(३३)

कृत्वा क्रोडे समरनिहतान् गाढमालिङ्ग्य बालान्
नित्यं स्वामिन्! मलिनवदनान् तांश्चुचुम्बीमि यावत्।
निद्रा द्राति प्रिय! मम कथा चाऽस्ति दैनन्दिनीयं
नागासाकी ह्यनुभवति कं स्वाऽपराधं तपस्वी।।

(३४)

युद्धस्फोटो हृदयनिहितो जर्मनीराष्ट्रदेहे
तद्विस्फोटात् तदिह हृदयं खण्डशोऽभूद् विभक्तम्।
तस्याऽङ्गारैः सकलपृथिवी कम्पिता स्वाऽपि दग्धा
किं वा ब्रूमो निरतिशयितं पश्य युद्धं समर्थम्।।

(३५)

एका जाती रुधिरमपि तद् वर्णभाषे तथैके
सत्यप्यैक्ये सकलविधिना त्वेवमेते विभिन्नाः।
मध्ये भित्तिस्सुदृढखचिता तत्र पूर्वाप्रतीच्योस्
तेषां मन्ये समरफलितः शोभनोऽयं समाधिः।।

(३६)

संसारेऽस्मिन् महति कतमो निर्दयस्तादृशस्स्यात्
क्रौर्यं तद् यः कथमपि सहेद् यद् वियन्नामयुद्धम्।
औदीच्यानां हृदि हृदि गता या निजोत्सर्गबुद्धिश्
चारित्र्यं सा जगति सुचिरं प्रेरयित्री भवित्री।।

(३७)

जन्माऽऽदौ च प्रकृतिविकृतौ यो हि युद्धाऽऽदिहेतुस्
तन्मध्येऽसौ नियतिपतितो हन्त इज़्राइलादिः।
क्रुद्धं व्याघ्रं मशक इव यः क्षोभयन् वीतभीतिः
कं वाऽयं नो समुदिशते शुद्धसङ्कल्पशक्तिम्।।

(३८)

एषा पृथ्वी बहुकलुषिता द्वेषमात्सर्यपूर्णा
तस्मात्स्वर्गं विगतकलुषं प्रत्यहं कल्पयेऽहम्।
सापेक्षत्वं प्रकृतिरिति हि प्रायशः सार्वभौमी
नैव त्याज्या किमिह पृथिवी किं ह्यलभ्यो द्युलोकः।।

(३९)

यद्यप्यद्य प्रिय ! विकसितो मानवः सभ्यतायां
युद्धक्षेत्रे प्रविशति यदा विस्मरत्यात्मरूपम्।
कार्याऽकार्यें चरति सततं सर्वदाऽबुद्धिपूर्वं
स्वस्याऽऽद्यत्वं विगतधिषणो वानरत्वं दधाति।।

(४०)

मौनं मौनं प्रसरति भृशं दिक्षु युद्धे निरुद्धे
मुग्धाऽऽकाशो रुरुदिषति किं जाड्यमालम्ब्य गाढम्।
मृद्वी पृथ्वी मलिनवदना शोकलीना विलीना
पृथ्व्याकाशौ हृदि कथयतो, हन्त, नष्टोपलब्धिः।।

(४१)

शान्ताऽवस्थां कथमपि सखे ! नैव शक्नोमि मातुं
नैवैकान्तं समरमभवन् नैव चैकान्तशान्तिः।
दृष्ट्वा बुद्धिर्भवति सुदृढा हीतिहासस्य पृष्ठं
संसारस्य प्रकृतिरिति सा शाश्वती शान्तियुद्धे।।

(४२)

संसारित्वान् निखिलमनुजश् शान्तियुद्धस्वभावस्
तस्माद् युद्धात् कथमपि न मे त्वां निरोद्धुं प्रयत्नः।
एतद् युद्धं शिरसि पतितं धर्म एवेति सत्यं
निस्सन्दिग्धं मरणसदृशं कातरत्वं हि मन्ये।।

(४३)

अस्तव्यस्तं स्खलितमथवा क्वाऽप्यसम्बद्धमेव
ह्यायातं यन् मम हृदि यथा तत् तथैवाऽङ्कितं भोः।
जानास्येव त्वमतिशिथिलं मामकीनं स्वभावं
तात्पर्याऽर्थं कथमपि सखे ! ज्ञायतां मे मनःस्थम्।।

(४४)

आशासेऽहं त्वमसि कुशली, सूचयेथास् तथापि
स्वस्योदन्तं, प्रतिदिनमहं त्वां यतश् चिन्तयामि।
शैथिल्येन स्खलितमिह यत् तत् समस्तं क्षमस्व
स्वामिन्नित्थं प्रणमति जनः सर्वदा तेऽनुरक्तः।।

इति पत्रस्य द्वितीयं पुटम्

## समाप्तञ्च पत्रम्

(४५)

पत्रं दृष्ट्वा निहितमनसा विस्मयाऽऽक्रान्तचित्तः
पर्यङ्कस्थामलसवदनां भ्रूविलासप्रवीणाम्।
लब्ध्वा चाऽसौ स्मरणपदवीं सुस्थिरं चित्रवत्तां
कैश्चिच्छब्दैर्घुणलिपिनयाद्रञ्जयामास पत्रम्।।

(४६)

साह्याऽयोग्ये विसविषलते ते हि भार्याभुशुण्ड्यौ
दृष्ट्वाऽपि त्वं सहनियमनं मे न मोहं गताऽसि।
स्मारं स्मारं मृदुलवदनं बाहुमध्ये लसन्तं
रूपाद् बुद्धिर् मम मलिनतां याति पत्रार्थलक्ष्यात्।।

(४७)

यक्षीभूतो नयनसलिलं मुञ्चमानः कदाचित्
सन्तप्तोऽहं विरहदहने ते यदा गाढमासम्।
घोरे नैशे तमसि मनसस् तापयित्रीं तदानी–
मुद्दिश्यैनां स्मृतिमकरुणामत्र चैवं मयोक्तम्।।

(४८)

धृत्वा गूढां छलजवनिकां व्यापृते ध्वान्तराज्ये
चित्तं रिक्तं व्यथयसि कथं निस्सहायं मदीयम्।
तावत्तिष्ठ स्मृत उपनता याति यावन्निशेयं
पश्चाद् यस्यास् त्वमसि सहजा तां दिदृक्षामि त्वाञ्च।।

(४९)

अस्म्यज्ञोऽहं जगति नियतं कर्मसङ्गी प्रसिद्धो
भेदं बुद्धेरिति न जनयेद् वेत्सि गीतोक्तनीतिम्।
सत्यं सैन्या वयमिह यतो कर्मणो मानसाच्च
तस्माच्चिन्त्यं कथमपि शपे नाऽस्ति पत्रं त्वदीयम्।।

(५०)

अर्थेनाऽर्थः क्वचिदपि न मे वेत्सि कश्चित् कदाचित्
पत्रस्याऽतो न हि कथमपि व्यर्थता शङ्कनीया।
सार्थाः शब्दाः सुमुखि ! सकला अङ्किकतास्त्वत्कराभ्यां
ये विस्मार्य त्रिभुवनमिदं त्वां सदा स्मारयन्ति।।

।। इति ।।

***

## शीकराः

(१)

नमामि भारतं वर्षं स्वरूपाऽलङ्कृतं चिरात्।
राहुग्रासविनिर्मुक्तं प्रतपन्तं प्रभाकरम्।।

(२)

नमामि 'इन्दिरां' भद्रां शक्तिविश्वासविग्रहाम्।
भविष्यध्वान्तसौदाम्नीं वर्तमानाऽन्धचन्द्रिकाम्।।

(३)

हसन्तिकास्फुलिङ्गानि व्युच्चरन्ति समन्ततः।
प्रस्फुरन्तीह कस्याऽपि विचारकणिकास्तथा।।

(४)

तिमितिमिलिङ्गक्रीडाक्षुब्धविक्षुब्धवारिधेः।
उद्भवन्तीह कस्याऽपि विचारा इव शीकराः।।

(५)

गुरुश्चेतिहासश्चिरं चिद्विलासः
सुबद्धाऽतिगुर्वी शुभा संस्कृतिश्च।
समस्तं गुरुत्वं सदा यस्य नित्यं
देवाऽस्ति राष्ट्रं तदेवाऽस्ति राष्ट्रम्।।

(६)

यतो हीनता मृत्युताऽऽपादयित्री
बलं सम्बलं जीवनं या च जातेः।
इयं यत्र सत्संस्कृतिर्भारतीया
तदेतद्धि नो भारतं सृष्टिरत्नम्।।

(७)

धनेनाऽपि किं वा स्मरेणाऽपि किं वा
पदेनाऽपि किं वा मदेनाऽपि किं वा ।

अमी जीवनं नैव धर्तुं समर्थाः
कथं जीवनं नो विना संस्कृतिं स्यात् ।।

(८)

भविष्यस्य चिन्तां रतिं वर्तमाने
विहायाऽनुरक्तं गते धिग्भवन्तम् ।
क्षिपन्त्येवमेते क्षिपन्त्वेवमेते
मुदाऽस्पृष्टहृत्कम्पनास्ते प्रलापान् ।।

(९)

अतीतं कथञ्चिन्न भेत्तुं समर्थां
स्वकीयामिमां दृष्टिसीमां विलोक्य ।
अनादिञ्च धर्मं चिरां संस्कृतिञ्च
न कालस्य पाशेन बद्धुं समर्थाः ।।

(१०)

हृदि न्यस्य या रक्षिता पूर्वजैर्नः
पुराणी तथा संस्कृतिर्न्यासभूता ।
तदेतद् धनं पुण्यपैतामहं नो
कथं वा न नो गौरवाय प्रभूतम् ।।

(११)

नवीनमित्येव न साधु सर्वं
यद्यत् पुराणं विकृतं न तत्तत् ।
कथं कुतः केन कदा निरुक्तं
नवीनता चिह्नमदोषतायाः ।।

(१२)

भूखण्डेन हि केवलेन विदिता राष्ट्रस्य किं राष्ट्रता ?
भूखण्डं यदि केवलं ननु ततो राष्ट्रस्य किं राष्ट्रता ?
जातिर्येन विशोधिताऽऽदिसमयाद् गाङ्गं पयो यद्धि तत्–
संस्कृत्या च तया युतं ह्यनुपमं मूल्यं परं भारतम् ।।

(१३)

आघातेष्वपि सत्सु भारतमिदं शिष्टं कथं? माऽस्तु
शिष्टश्चेदनलस्य दाहमहिमा शिष्टं न किं तस्य वा
यावत्तिष्ठति संस्कृतिर्दृढतया राष्ट्रं दृढं सम्मतं
शाखाकर्तनविक्रमेण किमहो मूलाश्रिता वृक्षता।।

(१४)

सत्यं शासनरज्जुसर्पफणतो भीतिर्न मे काचिद–
प्याख्यानाद् विरमेत् कथं नु रसना यावन्न सा कर्तिता।
सर्वत्राऽप्यपराधजालपतितो निर्दोष एवाऽस्म्यहं
चेदास्था त्वयि खण्डिता ननु ततो भूमे ! वृणे वध्यताम्।।

(१५)

माता माता भूमिर्भूमिः पुत्रोऽहं पुत्रोऽहं तस्याः।
देहाद् देहाद् वाचो वाचो भावाद् भावाद् भावाच्चाऽपि।।

(१६)

नित्यं भारतभारतीप्रकरणं श्रुत्वा दुरुक्तिं यथा
पापाद् बिभ्यति शष्कुलीः पिदधते कुर्वन्ति किं किं न ते।
एते राष्ट्रियमद्वयत्वमलसा आतन्वते राष्ट्रिया
आश्चर्यं न विदन्ति हन्त वदतो व्याघातदोषं निजम्।।

(१७)

नीत्या मण्डितराज्यमत्र कथितं सन्देग्धि कस्तत्र च
नीत्याः पण्डित ! किं नु धर्मविषये नीतिस्वरूपं मतम्।
तद् धर्मान्निरपेक्षता यदि तथा नीतेर्नु किं लक्ष्यते
चेत्किञ्चित्तव लक्षितं ननु ततो भिन्ना कथं रासभात्।।

(१८)

स्वार्थाऽऽप्तिक्षमबुद्धितन्त्रवशगो दुर्वारदुर्वासनो
धर्मं वेत्तु कथं नु नेतृसमजः पूर्णो जडः स्थावरः।

सूर्याचन्द्रमसोस्तमोऽपहरणं ज्योतिस्सुदूरस्थयोस्
तेषां पार्थिवदृष्टितो व्यवहितं द्यावापृथिव्यन्तरा।।

(१९)

क्रान्तिस्स्याद् रुधिरप्रसेकसुफला मा वाऽस्तु किं वा ततो
मूल्यं यत्तदवाप्तिसाधकतमं किं तन्न यत् साधनम्।
इस्लामोऽपि तदीयचिन्तनविधौ सत्यं च मूल्यं परं
तल्लब्धं लघुकालसीम्नि सकलं धन्या हि निष्ठाधना।।

(२०)

मीमांसे न तदीयधर्मरचनां मूल्याऽङ्कनं नेप्सितं
प्राप्तो वेति मुहम्मदीयपदवीमेकोऽपि किं शोच्यते ।
क्षुद्रस्वार्थखरास्त्रतामचकितं धर्मश्च यैः प्रापितस्
तेषामत्र सुधामुखस्थगरलं निश्शङ्कमुद्घाट्यते।।

(२१)

पायं पायममी महार्हमदिरामिस्लामनिर्देशतो
जेहादाख्ययुधि प्रवृत्तिमतलां दीक्षन्त उच्चैःस्वरैः।
धर्मे यद्धि निषिद्धकर्म कथितं कुर्वन्ति तद् धार्मिका
दौर्भाग्यादतिरिक्तमस्ति वद किं वेस्लामधर्मस्य तत्।।

(२२)

छायाशान्तिसुखप्रदं वटतरुं संसारतापापहं
आरूढस्त्ववरुद्धतत्प्रसरणो माद्यन्न किं लज्जसे।
ऐश्वर्यं सकलश्च तस्य विभवःसर्वं त्वया स्वीकृतं
धिग्धिक् त्वां परकीयरक्तरसनात् खर्जूर! पीनं परम् ।।

(२३)

मुग़लाऽन्वयसम्भूतो बाबरो दृढनिश्चयः।
विक्षिप्तनृपसामर्थ्ये प्रविष्टो हन्त भारते।।

(२४)

हिन्दूमुस्लिममिश्रणाऽतुलमहस्सम्पन्नसेनाऽग्रणी–
रिब्राहीमनृपो हि येन विजितस्त्विस्लाम किं वा स्वतः।
सोऽयं भूपतिबाबरो जयति तं साँगां हि जेहादतस्
सेनानीर्नृपधर्मयोर्वदतु कः कस्याऽत्र निष्पक्षतः।।

(२५)

नमामि काफ़िरान् सर्वान् मृत्युकौतुककामुकान्।
साह्यसम्भावनासिद्धिर् दर्शिता यैस्तपस्विभिः।।

(२६)

आबिदीनस्तथा दारा सम्राडकबरो वरः।
औदार्याऽऽकाशसङ्काशान् नौमि काफ़िरानिमान्।।

(२७)

शस्त्राशस्त्रिपरायणा अतिदृढं शास्त्राक्षराऽऽलम्बिनो
राजानो मुगलाऽन्वये समभवन् धर्मप्रिया अप्रियाः।।
अत्यन्तं समुदारबुद्धिविभवस्तत्राऽपि यः कोऽपि वा
धर्मध्वान्तनिशासु चिन्तनदिशा विद्युत्समो भासते।।

(२८)

औदार्याऽन्वितधारयैव किमपि प्रायेण सम्भाव्यते
याऽनौदार्यपराशयेति महिता वन्द्यैव सा दूरतः।।
यत्सत्ताघटघट्टने हि करणं युद्धं मतं मृन्मयं
शान्तिश्चेत् समपेक्ष्यते ननु ततः शुष्के सतृणायितम्।।

(२९)

गूढाऽऽकारेङ्गितस्याऽय अकबरस्य महात्मनः।
विषये महती भ्रान्तिः सन्देहश्च विपश्चिताम्।।

(३०)

इस्लामप्रणयान्न भारतमिदं सत्यं क्षमं शासितुं
हिन्दुद्वेषबलान्न भारतमिदं सत्यं क्षमं शासितुम्।
भूमिश्चेद्धि तिरस्कृता कथमिदं पुष्पं क्षमं पुष्पितुं
नीतिं धर्मसमानतामकबरंस्त्वित्थं व्यवास्थापयत्।।

(३१)

धर्मौदार्यदिवाकरोऽप्यनुदितो 'दाराशिकोहाऽभिधो'
योऽसौ धर्मघनोपलपहरणैरस्ताऽचलं प्रापितः।
आश्चर्यं ननु पश्य पश्य किमिदं दूरे दरीदृश्यते
सोऽयं सोऽयमहो सहस्रकिरणो यः सामरस्यध्वजः।।

(३२)

नानात्वं नितरां हि सिध्यति यदा नित्यं दिशस्येकतां
हिन्दूमुस्लिमभिन्नतां हृदि यदा नित्यं दिशस्येकताम्।
ऐक्यं किन्तु निरूप्यतां स्फुटतया तत्राऽक्षमश्चेत्तदा
मूर्तस् स्वीक्रियतामयं नृपसुतस्त्वैक्यप्रतीको वरः।।

(३३)

अत्यन्तं हि विरुद्धजातियुगलं पाणिग्रहप्रीतिभिर्
योऽसौ हन्त बबन्ध संस्कृतमिदं प्रौच्चैः पदं नीतवान्।
तद्ग्रन्थान् बहुलांश्च सार्थकगतिं भाषान्तरेणानयत्
सोऽयं 'ज़ैनुल आबिदीन' नृपतिर् वन्द्यः कथं कस्य नो।।

(३४)

आसीदत्र 'कबीर' नाम कविराड् धर्मद्विषो धार्मिको
हिन्दूमुस्लिमजातिमध्यपतितस् तत्राऽपि यो नो भयम्।
ऐक्यं रामरहीमयोरुपदिशन् धर्माऽद्वयं प्रोक्तवान्
सोऽयं संस्मरणीयतामनुगतिं कस्मान्न चाऽर्हत्यहो।।

(३५)

यद्यपि बहवः सन्ति तादृशा इष्टनायकाः।
ते यत्र क्वचिदुक्तेन चकारेण विवक्षिताः।।

(३६)

'अब्दाली' 'नृपनादिरो' 'गज़नवी' शिष्या अनल्पास्तथा
नीयन्ते स्मृतिवीथिकासु सुचिरं धर्माऽन्धताऽऽलिङ्गिताः।
सन्ध्यायामवलोक्यते तदुदिता ह्यद्याऽपि रक्तच्छटा
नैशीथेऽपि च सूचिभेद्यतमसि प्रध्वंसंस्तब्धता।।

(३७)

पूर्वं येन नृमेधयज्ञसुकृतं सत्यं सुसम्पादितं
रक्ताऽऽस्वादनशान्तकण्ठरसना कण्डूकृतार्थश्च यः।
धत्ते चित्रमसौ हि बन्धनगृहे रूपं 'नृयाजिव्रजो'
यद्योग्या वरसुन्दरी स च दरीरक्षो दरीदृश्यते।।

(३८)

यंद्यपि बहवः सन्ति तादृशाः खलनायकाः।
ते यत्र क्वचिदुक्तेन चकारेण विवक्षिताः।।

(३९)

किं नूत्नं समुपागतोऽसि सुतरामिस्लाम ते स्वागतं
किं नूत्नं यदि तेऽस्ति विस्तररतिर्धर्मस्य सा धर्मता।
नूनं नूत्नमिवाचरस्यनुदिनं भूमिं च नो मातरं
केशाऽऽकर्षणभोग्यतैकवशतां दासीमिवाऽऽपाद्य ताम्।।

(४०)

आस्था मूल्ये प्रतननिजता प्राक्तनश्चेतिहासः
संस्कृत्यादौ हृदि हृदि गता गौरवस्याऽनुभूतिः।
एवद्ध्वंसप्रतिनिधिनिभे नक्सलीये युगेऽस्मिन्
नौकां स्रष्टा प्रलयसमये मृग्यतां कोऽपि नेता।।

(४१)

समतामिताञ्च निरूपयितस्
तव सङ्ग्रहवृत्तिविदूषकता।
प्रतिभासयति प्रतिमां प्रचुरा–
मयि नेतृवर ! प्रणमानि कथम्।।

(४२)

करतस्करता प्रतिभा प्रथिता
न च विस्मरणप्रियता प्रमिता।
महती हि कृतिः प्रकृतिर्महता–
मयि नेतृवर! प्रणमानि कथम्।।

(४३)

भवदीयमहो भवदीपशिखं
गुणगुच्छगणं गणयानि कथम्।
तव कीर्तिकथां कथयानि कथं
अयि नेतृवर ! प्रणमानि कथम्।।

(४४)

न चाटुवाचा किल मत्प्रयोजनं
प्रसादिता सा ननु किं प्रदास्यति।
नमामि तां भूरि यदीयकैतवात्
समाजवादस्त्ववभासते सखे।।

(४५)

नित्यः शब्दार्थसम्बन्धो यद्यप्युक्तो मनीषिभिः।
समाजवादवच्छब्दा विभान्त्यर्थविवर्जिताः।।

(४६)

सङ्गीतं च कला च मञ्जुकविता सौन्दर्यलक्ष्मीश्च या
ऊढास्तास्तु समाजवादनयतो भार्याश्चतस्रो मम।

सर्वासामहमस्म्यनन्यसुपतिः सर्वाः प्रियाः प्राणतस्
त्वाऽऽलिङ्गन्ति चुचुम्बिषन्ति बलतो हा हन्त ता लम्पटाः।।

(४७)

नित्यं काञ्चनकर्दमाऽऽकरचराः पाटच्चराः कच्चराः
दन्तादन्तिविवादतुन्दिलतराः कुक्षिम्भराः कुक्कुराः।
सौन्दर्यं ननु मामकं कुलधनं ह्येते कुतो वञ्चका
हा हा हा प्रकृतिं प्रियां प्रियतमां कर्षन्ति धर्षन्ति च।।

(४८)

एते वित्तविभुप्रभुत्वनिचया निष्कण्टाः कण्टका
एते सर्वकलाधुरन्धरधियो सत्यं धरित्रीधराः।
सङ्गीतं ननु गीयते सहृदयाऽऽस्वाद्यं परं तद् रसं
जिह्वालौल्यवशाः सतीमिव विटा भुञ्जन्ति पाषण्डिनः।।

(४९)

समाऽवसरसौविध्यं सर्वेषां योग्यताऽऽश्रितम्।
समासेन प्रवक्तव्यं समाजवादलक्षणम्।।

(५०)

भारती स्राग्णिी भारती स्रग्विणी
स्रग्विणी भारती स्रग्विणी भारती।
भारतं मौक्तिकं भारतं मौक्तिकं
मौक्तिकं भारतं मौक्तिकं भारतम्।।

***

# घोषणा–पत्र

'अजस्रा' नामक समाचारपत्र के सम्बन्ध में समाचारपत्र– रजिस्ट्रीकरण (केन्द्रीय) नियमावली, १९५६ के नियम ८ (१) के अधीन प्रकाशितव्य स्वामित्व–सम्बन्धी तथा अन्य ब्योरे।

**प्रारूप चार**

**१–प्रकाशन का स्थान–** अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' अलीगञ्ज, लखनऊ–२२६ ०२४

**२–प्रकाशन की कालिकता–** त्रैमासिक (मकर, मेष तथा कर्क, तुला की सङ्क्रान्तियों को)

**३–मुद्रक का–**
(१) नाम–श्री मनीष मेहता
(२) राष्ट्रिकता–भारतीय
(३) पता–प्नार आफसेट, १७, अशोक मार्ग, हजरतगंज लखनऊ–२२६ ०१८

**४–प्रकाशक का**
(१) नाम–श्री जितेन्द्रकुमार त्रिपाठी
(२) राष्ट्रिकता–भारतीय
(३) पता–सी–२४, 'क', 'जे' रोड महानगर विस्तार लखनऊ– २२६ ०२०

**५–सम्पादक का**
(१) नाम–डॉ. अशोककुमार कालिया
(२) राष्ट्रिकता–भारतीय
(३) पता–बी–१ /१६, कल्याण विहार, सेक्टर 'के' अलीगञ्ज, लखनऊ– २२६ ०२४

**६–स्वामी का नाम और पता–** अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' लखनऊ–२२६ ०२४

मैं, जितेन्द्रकुमार त्रिपाठी, एतद्द्वारा घोषित करता हूँ कि ऊपर दिये हुये ब्योरे मेरे पूर्णतम ज्ञान और विश्वास के अनुसार सत्य हैं।

(ह.) जितेन्द्र कुमार त्रिपाठी
प्रकाशक (अखिल भारतीय संस्कृत–परिषद्,
लखनऊ की ओर से)

ISSN : 2278-3741

पञ्ची. सङ्ख्या आर. एन. २६२३२/७७
अङ्काः १ – ४
वर्षः ४२